विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।
निर्ममो निरहंकारः स शान्तिमधिगच्छति॥

विहाय, कामान्, यः, सर्वान्, पुमान्, चरति, निःस्पृहः, निर्ममः, निरहंकारः, सः, शान्तिम्, अधिगच्छति ॥७१॥

क्योंकि—

यः	=जो	निरहंकारः	=अहंकाररहित
पुमान्	=पुरुष	निःस्पृहः	={स्पृहारहित हुआ
सर्वान्	=संपूर्ण	चरति	=बर्तता है
कामान्	=कामनाओंको	सः	=वह
विहाय	=त्यागकर	शान्तिम्	=शान्तिको
निर्ममः	=ममतारहित (और)	अधिगच्छति	=प्राप्त होता है

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति

एषा, ब्राह्मी, स्थितिः, पार्थ, न, एनाम्, प्राप्य, विमुह्यति, स्थित्वा, अस्याम्, अन्तकाले, अपि, ब्रह्मनिर्वाणम्, ऋच्छति॥

पार्थ	= हे अर्जुन		(और)
एषा	= यह	अन्तकाले	= अन्तकालमें
ब्राह्मी	= ब्रह्मको प्राप्त हुए पुरुषकी	अपि	= भी
स्थितिः	= स्थिति है	अस्याम्	= इस निष्ठामें
एनाम्	= इसको	स्थित्वा	= स्थित होकर
प्राप्य	= प्राप्त होकर	ब्रह्मनिर्वाणम्	= ब्रह्मानन्दको
न विमुह्यति	= मोहित नहीं होता है	ऋच्छति	= प्राप्त हो जाता है

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-
संवादे सांख्ययोगो नाम
द्वितीयोऽध्यायः ॥ २ ॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा
योगशास्त्रविषयक श्रीकृष्ण और अर्जुनके
संवादमें "सांख्ययोग" नामक
दूसरा अध्याय ॥ २ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

ज्ञानयोगेन =ज्ञानयोगसे*
(और)
योगिनाम् =योगियोंकी

कर्मयोगेन = निष्काम कर्मयोगसे†

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥

न, कर्मणाम्, अनारम्भात्, नैष्कर्म्यम्, पुरुषः, अश्नुते, न, च, संन्यसनात्, एव, सिद्धिम्, समधिगच्छति ॥ ४ ॥

परन्तु किसी भी मार्गके अनुसार कर्मोंको स्वरूपसे त्यागनेकी आवश्यकता नहीं है; क्योंकि—

पुरुषः =मनुष्य
न =न (तो)
कर्मणाम् =कर्मोंके

अनारम्भात्=न करनेसे
नैष्कर्म्यम् =निष्कर्मताको‡
अश्नुते =प्राप्त होता है

---

* मायासे उत्पन्न हुए संपूर्ण गुण ही गुणोंमें बर्तते हैं, ऐसे समझकर तथा मन, इन्द्रिय और शरीरद्वारा होनेवाली संपूर्ण क्रियाओंमें कर्तापनके अभिमानसे रहित होकर सर्वव्यापी सच्चिदानन्दघन परमात्मामें एकीभावसे स्थित रहनेका नाम 'ज्ञानयोग' है, इसीको 'संन्यास', 'सांख्ययोग' इत्यादि नामोंसे कहा है ।

† फल और आसक्तिको त्यागकर भगवत्-आज्ञानुसार केवल भगवत्-अर्थ समत्वबुद्धिसे कर्म करनेका नाम 'निष्काम कर्मयोग' है, इसीको 'समत्वयोग,' 'बुद्धियोग,' 'कर्मयोग', 'तदर्थकर्म', 'मदर्थकर्म', 'मत्कर्म' इत्यादि नामोंसे कहा है ।

‡ जिस अवस्थाको प्राप्त हुए पुरुषके कर्म अकर्म हो जाते हैं अर्थात् फल उत्पन्न नहीं कर सकते, उस अवस्थाका नाम 'निष्कर्मता' है ।

च = और
न = न
संन्यसनात् = कर्मोंको त्यागनेमात्रसे
एव
सिद्धिम् = भगवत्-साक्षात्कार-रूप सिद्धिको
समधिगच्छति = प्राप्त होता है

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥

न, हि, कश्चित्, क्षणम्, अपि, जातु, तिष्ठति, अकर्मकृत्, कार्यते, हि, अवशः, कर्म, सर्वः, प्रकृतिजैः, गुणैः ॥ ५ ॥

तथा सर्वथा कर्मोंका स्वरूपसे त्याग हो भी नहीं सकता—

हि = क्योंकि
कश्चित् = कोई भी (पुरुष)
जातु = किसी कालमें
क्षणम् = क्षणमात्र
अपि = भी
अकर्मकृत् = बिना कर्म किये
न = नहीं
तिष्ठति = रहता है
हि = निःसन्देह
सर्वः = सब (ही पुरुष)
प्रकृतिजैः = प्रकृतिसे उत्पन्न हुए
गुणैः = गुणोंद्वारा
अवशः = परवश हुए
कर्म = कर्म
कार्यते = करते हैं

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥

कर्मेन्द्रियाणि, संयम्य, यः, आस्ते, मनसा, स्मरन्, इन्द्रियार्थान्, विमूढात्मा, मिथ्याचारः, सः, उच्यते ॥ ६ ॥

इसलिये—

यः	=जो	मनसा	=मनसे
विमूढात्मा	=मूढबुद्धि पुरुष	स्मरन्	=चिन्तन करता
कर्मेन्द्रियाणि	=कर्मेन्द्रियोंको (हठसे)	आस्ते	=रहता है
		सः	=वह
संयम्य	=रोककर	मिथ्याचारः	={मिथ्याचारी अर्थात् दम्भी
इन्द्रियार्थान्	={इन्द्रियोंके भोगोंको	उच्यते	=कहा जाता है

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥

यः, तु, इन्द्रियाणि, मनसा, नियम्य, आरभते, अर्जुन, कर्मेन्द्रियैः, कर्मयोगम्, असक्तः, सः, विशिष्यते ॥ ७ ॥

तु	=और	कर्मेन्द्रियैः	=कर्मेन्द्रियोंसे
अर्जुन	=हे अर्जुन	कर्मयोगम्	=कर्मयोगका
यः	=जो (पुरुष)	आरभते	={आचरण करता है
मनसा	=मनसे	सः	=वह
इन्द्रियाणि	=इन्द्रियोंको	विशिष्यते	=श्रेष्ठ है
नियम्य	=वशमें करके		
असक्तः	=अनासक्त हुआ		

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥

नियतम्, कुरु, कर्म, त्वम्, कर्म, ज्यायः, हि, अकर्मणः, शरीरयात्रा, अपि, च, ते, न, प्रसिद्धयेत्, अकर्मणः ॥८॥

इसलिये—

त्वम्	= तू	कर्म	= कर्म करना
नियतम्	= शास्त्रविधिसे नियत किये हुए	ज्यायः	= श्रेष्ठ है
कर्म	= स्वधर्मरूप कर्मको	च	= तथा
कुरु	= कर	अकर्मणः	= कर्म न करनेसे
हि	= क्योंकि	ते	= तेरा
अकर्मणः	= कर्म न करने- की अपेक्षा	शरीरयात्रा	= शरीरनिर्वाह
		अपि	= भी
		न	= नहीं
		प्रसिद्धयेत्	= सिद्ध होगा

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥

यज्ञार्थात्, कर्मणः, अन्यत्र, लोकः, अयम्, कर्मबन्धनः, तदर्थम्, कर्म, कौन्तेय, मुक्तसङ्गः, समाचर ॥ ९ ॥

और हे अर्जुन ! बन्धनके भयसे भी कर्मोंका त्याग करना योग्य नहीं है, क्योंकि—

यज्ञार्थात्	= यज्ञ अर्थात् विष्णुके निमित्त किये हुए	कर्मणः	= कर्मके सिवाय
		अन्यत्र	= अन्य कर्ममें (लगा हुआ ही)

अयम् = यह
लोकः = मनुष्य
कर्मबन्धनः = कर्मोंद्वारा बंधता है (इसलिये)
कौन्तेय = हे अर्जुन
मुक्तसङ्गः = आसक्तिसे रहित हुआ
तदर्थम् = उस परमेश्वर-के निमित्त
कर्म = कर्मका
समाचर = भली प्रकार आचरण कर

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

सहयज्ञाः, प्रजाः, सृष्ट्वा, पुरा, उवाच, प्रजापतिः,
अनेन, प्रसविष्यध्वम्, एषः, वः, अस्तु, इष्टकामधुक् ॥१०॥

तथा कर्म न करनेसे तू पापको भी प्राप्त होगा; क्योंकि —

प्रजापतिः = प्रजापति (ब्रह्मा) ने
पुरा = कल्पके आदिमें
सहयज्ञाः = यज्ञसहित
प्रजाः = प्रजाको
सृष्ट्वा = रचकर
उवाच = कहा कि
अनेन = इस यज्ञद्वारा (तुमलोग)
प्रसविष्यध्वम् = वृद्धिको प्राप्त होवो (और)
एषः = यह यज्ञ
वः = तुमलोगोंको
इष्टकामधुक् = इच्छित कामनाओंके देनेवाला
अस्तु = होवे

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

देवान्, भावयत, अनेन, ते, देवाः, भावयन्तु, वः,
परस्परम्, भावयन्तः, श्रेयः, परम्, अवाप्स्यथ ॥११॥

तथा तुमलोग—

अनेन	= इस यज्ञद्वारा	(एवम्)	= इस प्रकार
देवान्	= देवताओंकी	परस्परम्	= आपसमें (कर्तव्य समझकर)
भावयत	= उन्नति करो (और)	भावयन्तः	= उन्नति करते हुए
ते	= वे	परम्	= परम
देवाः	= देवतालोग	श्रेयः	= कल्याणको
वः	= तुमलोगोंकी	अवाप्स्यथ	= प्राप्त होवोगे
भावयन्तु	= उन्नति करें		

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥

इष्टान्, भोगान्, हि, वः, देवाः, दास्यन्ते, यज्ञभाविताः,
तैः, दत्तान्, अप्रदाय, एभ्यः, यः, भुङ्क्ते, स्तेनः, एव, सः १२

तथा—

यज्ञभाविताः	= यज्ञद्वारा बढ़ाये हुए	(बिना मांगे ही)	
देवाः	= देवतालोग	इष्टान्	= प्रिय
वः	= तुम्हारे लिये	भोगान्	= भोगोंको
		दास्यन्ते	= देंगे

तैः	= उनके द्वारा	हि	= ही
दत्तान्	= दिये हुए भोगोंको	भुङ्क्ते	= भोगता है
यः	= जो पुरुष	सः	= वह
एभ्यः	= इनके लिये	एव	= निश्चय
अप्रदाय	= बिना दिये	स्तेनः	= चोर है

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥

यज्ञशिष्टाशिनः, सन्तः, मुच्यन्ते, सर्वकिल्बिषैः,
भुञ्जते, ते, तु, अघम्, पापाः, ये, पचन्ति, आत्मकारणात् १३

कारण कि—

यज्ञशिष्टाशिनः	= यज्ञसे शेष बचे हुए अन्नको खानेवाले	पापाः	= पापीलोग
		आत्मकारणात्	= अपने (शरीर-पोषणके) लिये ही
सन्तः	= श्रेष्ठ पुरुष	पचन्ति	= पकाते हैं
सर्वकिल्बिषैः	= सब पापोंसे	ते	= वे
मुच्यन्ते	= छूटते हैं (और)	तु	= तो
		अघम्	= पापको ही
ये	= जो	भुञ्जते	= खाते हैं

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥

अन्नात्, भवन्ति, भूतानि, पर्जन्यात्, अन्नसम्भवः,
यज्ञात्, भवति, पर्जन्यः, यज्ञः, कर्मसमुद्भवः ॥१४॥

क्योंकि—

भूतानि	= संपूर्ण प्राणी	पर्जन्यः	= वृष्टि
अन्नात्	= अन्नसे	यज्ञात्	= यज्ञसे
भवन्ति	= उत्पन्न होते हैं (और)	भवति	= होती है (और वह)
अन्नसम्भवः	= अन्नकी उत्पत्ति	यज्ञः	= यज्ञ
पर्जन्यात्	= वृष्टिसे होती है (और)	कर्मसमुद्भवः	= कर्मोंसे उत्पन्न होनेवाला है

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥

कर्म, ब्रह्मोद्भवम्, विद्धि, ब्रह्म, अक्षरसमुद्भवम्,
तस्मात्, सर्वगतम्, ब्रह्म, नित्यम्, यज्ञे, प्रतिष्ठितम् ॥१५॥

तथा उस—

कर्म	= कर्मको (तूं)	तस्मात्	= इससे
ब्रह्मोद्भवम्	= वेदसे उत्पन्न हुआ	सर्वगतम्	= सर्वव्यापी
विद्धि	= जान (और)	ब्रह्म	= परम अक्षर (परमात्मा)
ब्रह्म	= वेद	नित्यम्	= सदा ही
अक्षर-समुद्भवम्	= अविनाशी (परमात्मा) से उत्पन्न हुआ है	यज्ञे	= यज्ञमें
		प्रतिष्ठितम्	= प्रतिष्ठित है

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति॥

एवम्, प्रवर्तितम्, चक्रम्, न, अनुवर्तयति, इह, यः,
अघायुः, इन्द्रियारामः, मोघम्, पार्थ, सः, जीवति ॥१६॥

पार्थ = हे पार्थ
यः = जो पुरुष
इह = इस लोकमें
एवम् = इस प्रकार
प्रवर्तितम् = चलाये हुए
चक्रम् = सृष्टिचक्रके
न अनुवर्तयति = अनुसार नहीं बर्तता है (अर्थात् शास्त्र-अनुसार कर्मोंको नहीं करता है)
सः = वह
इन्द्रियारामः = इन्द्रियोंके सुखको भोगनेवाला
अघायुः = पापआयु (पुरुष)
मोघम् = व्यर्थ ही
जीवति = जीता है

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते॥

यः, तु, आत्मरतिः, एव, स्यात्, आत्मतृप्तः, च, मानवः,
आत्मनि, एव, च, संतुष्टः, तस्य, कार्यम्, न, विद्यते ॥१७॥

तु = परन्तु
यः = जो

मानवः	= मनुष्य	एव	= ही
आत्मरतिः एव	= आत्माहीमें प्रीतिवाला	संतुष्टः	= संतुष्ट
		स्यात्	= होवे
च	= और	तस्य	= उसके लिये
आत्मतृप्तः	= आत्माहीमें तृप्त	कार्यम्	= कोई कर्तव्य
च	= तथा	न	= नहीं
आत्मनि	= आत्मामें	विद्यते	= है

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥

न, एव, तस्य, कृतेन, अर्थः, न, अकृतेन, इह, कश्चन,
न, च, अस्य, सर्वभूतेषु, कश्चित्, अर्थव्यपाश्रयः ॥१८॥

क्योंकि—

इह	= इस संसारमें		(प्रयोजन)
तस्य	= उस (पुरुष) का	न	= नहीं है
कृतेन	= किये जानेसे	च	= तथा
एव	= भी (कोई)	अस्य	= इसका
अर्थः	= प्रयोजन	सर्वभूतेषु	= संपूर्ण भूतोंमें
न	= नहीं है (और)	कश्चित्	= कुछ भी
अकृतेन	= न किये जानेसे (भी)	अर्थ-व्यपाश्रयः	= स्वार्थका सम्बन्ध
कश्चन	= कोई	न	= नहीं है

तो भी उसके द्वारा केवल लोकहितार्थ कर्म किये जाते हैं।

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥

तस्मात्, असक्तः, सततम्, कार्यम्, कर्म, समाचर,
असक्तः, हि, आचरन्, कर्म, परम्, आप्नोति, पूरुषः ॥१९॥

तस्मात्	= इससे (तूं)	हि	= क्योंकि
असक्तः	= अनासक्त हुआ	असक्तः	= अनासक्त
सततम्	= निरन्तर	पूरुषः	= पुरुष
कार्यम्	= कर्तव्य	कर्म	= कर्म
कर्म	= कर्मको	आचरन्	= करता हुआ
समाचर	= अच्छी प्रकार आचरण कर	परम्	= परमात्माको
		आप्नोति	= प्राप्त होता है

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥

कर्मणा, एव, हि, संसिद्धिम्, आस्थिताः, जनकादयः,
लोकसंग्रहम्, एव, अपि, संपश्यन्, कर्तुम्, अर्हसि ॥२०॥

इस प्रकार—

जनकादयः	= जनकादि ज्ञानीजन भी (आसक्तिरहित)	एव	= ही
		संसिद्धिम्	= परमसिद्धिको
		आस्थिताः	= प्राप्त हुए हैं
कर्मणा	= कर्मद्वारा	हि	= इसलिये (तथा)

लोकसंग्रहम्	= लोकसंग्रहको	कर्तुम्	= कर्म करनेको
संपश्यन्	= देखता हुआ	एव	= ही
अपि	= भी (तूं)	अर्हसि	= योग्य है

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥२१॥

यत्, यत्, आचरति, श्रेष्ठः, तत्, तत्, एव, इतरः, जनः, सः, यत्, प्रमाणम्, कुरुते, लोकः, तत्, अनुवर्तते ॥२१॥

क्योंकि–

श्रेष्ठः	= श्रेष्ठ पुरुष		(अनुसार बर्तते हैं)
यत्	= जो	सः	= वह पुरुष
यत्	= जो	यत्	= जो कुछ
आचरति	= आचरण करता है	प्रमाणम्	= प्रमाण
इतरः	= अन्य	कुरुते	= कर देता है
जनः	= पुरुष (भी)	लोकः	= लोग (भी)
तत्	= उस	तत्	= उसके
तत्	= उसके	अनुवर्तते	= अनुसार बर्तते हैं*
एव	= ही		

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥

---

* यहां क्रियामें एकवचन है, परंतु लोक शब्द समुदायवाचक होनेसे भाषामें बहुवचनकी क्रिया लिखी गयी है ।

न, मे, पार्थ, अस्ति, कर्तव्यम्, त्रिषु, लोकेषु, किंचन, न, अनवाप्तम्, अवाप्तव्यम्, वर्ते, एव, च, कर्मणि ॥२२॥

इसलिये—

पार्थ	= हे अर्जुन (यद्यपि)		(किंचित् भी)
मे	= मुझे	अवाप्तव्यम्	= प्राप्त होने योग्य वस्तु
त्रिषु	= तीनों	अनवाप्तम्	= अप्राप्त
लोकेषु	= लोकोंमें	न	= नहीं है (तो भी मैं)
किंचन	= कुछ भी	कर्मणि	= कर्ममें
कर्तव्यम्	= कर्तव्य	एव	= ही
न	= नहीं	वर्ते	= बर्तता हूं
अस्ति	= है		
च	= तथा		

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

यदि, हि, अहम्, न, वर्तेयम्, जातु, कर्मणि, अतन्द्रितः, मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः ॥२३॥

हि	= क्योंकि	कर्मणि	= कर्ममें
यदि	= यदि	न	= न
अहम्	= मैं	वर्तेयम्	= बर्तूं (तो)
अतन्द्रितः	= सावधान हुआ	पार्थ	= हे अर्जुन
जातु	= कदाचित्	सर्वशः	= सब प्रकारसे

मनुष्याः	= मनुष्य	अनुवर्तन्ते =	अनुसार बर्तते हैं अर्थात् बर्तने लग जायं
मम	= मेरे		
वर्त्म	= बर्तावके		

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥

उत्सीदेयुः, इमे, लोकाः, न, कुर्याम्, कर्म, चेत्, अहम्, संकरस्य, च, कर्ता, स्याम्, उपहन्याम्, इमाः, प्रजाः ॥ २४ ॥

तथा—

चेत्	= यदि	संकरस्य	= वर्णसंकरका
अहम्	= मैं	कर्ता	= करनेवाला
कर्म	= कर्म	स्याम्	= होऊं (तथा)
न	= न	इमाः	= इस सारी
कुर्याम्	= करूं (तो)	प्रजाः	= प्रजाको
इमे	= यह सब	उपहन्याम् =	हनन करूं अर्थात् मारने-वाला बनूं
लोकाः	= लोक		
उत्सीदेयुः	= भ्रष्ट हो जायं		
च	= और (मैं)		

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥

सक्ताः, कर्मणि, अविद्वांसः, यथा, कुर्वन्ति, भारत, कुर्यात्, विद्वान्, तथा, असक्तः, चिकीर्षुः, लोकसंग्रहम् ॥ २५ ॥

इसलिये—

भारत	= हे भारत
कर्मणि	= कर्ममें
सक्ताः	= आसक्त हुए
अविद्वांसः	= अज्ञानीजन
यथा	= जैसे
कुर्वन्ति	= कर्म करते हैं
तथा	= वैसे ही
असक्तः	= अनासक्त हुआ
विद्वान्	= विद्वान् भी
लोक-संग्रहम्	= लोकशिक्षाको
चिकीर्षुः	= चाहता हुआ
कुर्यात्	= कर्म करे

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥

न, बुद्धिभेदम्, जनयेत्, अज्ञानाम्, कर्मसङ्गिनाम्, जोषयेत्, सर्वकर्माणि, विद्वान्, युक्तः, समाचरन् ॥२६॥

तथा—

विद्वान्	= ज्ञानी पुरुष (को चाहिये कि)
कर्म-सङ्गिनाम्	= कर्मोंमें आसक्तिवाले
अज्ञानाम्	= अज्ञानियोंकी
बुद्धिभेदम्	= बुद्धिमें भ्रम अर्थात् कर्मोंमें अश्रद्धा
न जनयेत्	= उत्पन्न न करे
	(किंतु स्वयं)
युक्तः	= परमात्माके स्वरूपमें स्थित हुआ (और)
सर्वकर्माणि	= सब कर्मोंको
समाचरन्	= अच्छी प्रकार करता हुआ (उनसे भी वैसे ही)
जोषयेत्	= करावे

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥

प्रकृतेः, क्रियमाणानि, गुणैः, कर्माणि, सर्वशः,
अहंकारविमूढात्मा, कर्ता, अहम्, इति, मन्यते ॥२७॥

और हे अर्जुन ! वास्तवमें—

सर्वशः	= संपूर्ण	अहंकार विमूढात्मा	= अहंकारसे मोहित हुए अन्तःकरण-वाला पुरुष
कर्माणि	= कर्म		
प्रकृतेः	= प्रकृतिके		
गुणैः	= गुणोंद्वारा	अहम्	= मैं
क्रियमाणानि	= किये हुए हैं	कर्ता	= कर्ता हूं
	(तो भी)	इति	= ऐसे
		मन्यते	= मान लेता है

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥

तत्त्ववित्, तु, महाबाहो, गुणकर्मविभागयोः,
गुणाः, गुणेषु, वर्तन्ते, इति, मत्वा, न, सज्जते ॥२८॥

तु	= परन्तु	गुणकर्म-विभागयोः	= गुणविभाग और कर्म-विभागके*
महाबाहो	= हे महाबाहो		

* त्रिगुणात्मक मायाके कार्यरूप पांच महाभूत और मन, बुद्धि,

तत्त्ववित्	= तत्त्वको* जाननेवाला (ज्ञानी पुरुष)	वर्तन्ते	= बर्तते हैं
		इति	= ऐसे
		मत्वा	= मानकर
गुणाः	= संपूर्ण गुण	न	= नहीं
गुणेषु	= गुणोंमें	सज्जते	= आसक्त होतां है

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत्॥

प्रकृतेः, गुणसंमूढाः, सज्जन्ते, गुणकर्मसु, तान्, अकृत्स्नविदः, मन्दान्, कृत्स्नवित्, न, विचालयेत्॥ २९॥

और—

प्रकृतेः	= प्रकृतिके	मन्दान्	= मूर्खोंको
गुणसंमूढाः	= गुणोंसे मोहित हुए पुरुष	कृत्स्नवित्	= अच्छी प्रकार जाननेवाला (ज्ञानी पुरुष)
गुणकर्मसु	= गुण और कर्मोंमें		
सज्जन्ते	= आसक्त होते हैं		
तान्	= उन		
अकृत्स्नविदः	= अच्छी प्रकार न समझनेवाले	न विचालयेत्	= चलायमान न करे

अहंकार तथा पांच ज्ञानेन्द्रियां, पांच कर्मेन्द्रियां और शब्दादि पांच विषय इन सबके समुदायका नाम 'गुणविभाग' है और इनकी परस्परकी चेष्टाओंका नाम 'कर्मविभाग' है।

* उपरोक्त 'गुणविभाग' और 'कर्मविभाग'से आत्माको पृथक् अर्थात् निर्लेप जानना ही इनका तत्त्व जानना है।

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥

मयि, सर्वाणि, कर्माणि, संन्यस्य, अध्यात्मचेतसा,
निराशीः, निर्ममः, भूत्वा, युध्यस्व, विगतज्वरः ॥३०॥

इसलिये हे अर्जुन ! तूं—

अध्यात्म-चेतसा = ध्याननिष्ठ चित्तसे
सर्वाणि = संपूर्ण
कर्माणि = कर्मोंको
मयि = मुझमें
संन्यस्य = समर्पण करके
निराशीः = आशारहित

(और)

निर्ममः = ममतारहित
भूत्वा = होकर
विगतज्वरः = सन्तापरहित (हुआ)
युध्यस्व = युद्ध कर

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तोमुच्यन्तेतेऽपिकर्मभिः॥

ये, मे, मतम्, इदम्, नित्यम्, अनुतिष्ठन्ति, मानवाः,
श्रद्धावन्तः, अनसूयन्तः, मुच्यन्ते, ते, अपि, कर्मभिः ॥३१॥

और हे अर्जुन—

ये = जो कोई
अपि = भी
मानवाः = मनुष्य
अनसूयन्तः = दोषबुद्धिसे रहित

(और)

श्रद्धावन्तः = श्रद्धासे युक्त हुए
नित्यम् = सदा (ही)
मे = मेरे
इदम् = इस

मतम्	= मतके	ते	= वे पुरुष
अनुतिष्ठन्ति	= अनुसार बर्तते हैं	कर्मभिः	= संपूर्ण कर्मोंसे
		मुच्यन्ते	= छूट जाते हैं

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः॥

ये, तु, एतत्, अभ्यसूयन्तः, न, अनुतिष्ठन्ति, मे, मतम्,
सर्वज्ञानविमूढान्, तान्, विद्धि, नष्टान्, अचेतसः॥३२॥

तु	= और	तान्	= उन
ये	= जो	सर्वज्ञान-विमूढान्	= संपूर्ण ज्ञानोंमें मोहित चित्तवालोंको (तू)
अभ्यसूयन्तः	= दोषदृष्टिवाले		
अचेतसः	= मूर्खलोग		
एतत्	= इस		
मे	= मेरे	नष्टान्	= कल्याणसे भ्रष्ट हुए (ही)
मतम्	= मतके		
न अनुतिष्ठन्ति	= अनुसार नहीं बर्तते हैं	विद्धि	= जान

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति॥

सदृशम्, चेष्टते, स्वस्याः, प्रकृतेः, ज्ञानवान्, अपि,
प्रकृतिम्, यान्ति, भूतानि, निग्रहः, किम्, करिष्यति॥३३॥

क्योंकि—

भूतानि	= सभी प्राणी	स्वस्याः	= अपनी
प्रकृतिम्	= प्रकृतिको	प्रकृतेः	= प्रकृतिके
यान्ति	= प्राप्त होते हैं अर्थात् अपने स्वभावसे परवश हुए कर्म करते हैं	सदृशम्	= अनुसार
		चेष्टते	= चेष्टा करता है (फिर इसमें किसीका)
		निग्रहः	= हठ
ज्ञानवान्	= ज्ञानवान्	किम्	= क्या
अपि	= भी	करिष्यति	= करेगा

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥

इन्द्रियस्य, इन्द्रियस्य, अर्थे, रागद्वेषौ, व्यवस्थितौ, तयोः, न, वशम्, आगच्छेत्, तौ, हि, अस्य, परिपन्थिनौ॥ ३ ४॥

इसलिये मनुष्यको चाहिये कि—

इन्द्रियस्य	= इन्द्रिय	वशम्	= वशमें
इन्द्रियस्य	= इन्द्रियके	न	= नहीं
अर्थे	= अर्थमें अर्थात् सभी इन्द्रियोंके भोगोंमें	आगच्छेत्	= होवे
		हि	= क्योंकि
		अस्य	= इसके
		तौ	= वे दोनों (ही)
व्यवस्थितौ	= स्थित (जो)	परिपन्थिनौ	= कल्याणमार्गमें विघ्न करनेवाले महान् शत्रु हैं
रागद्वेषौ	= राग और द्वेष हैं		
तयोः	= उन दोनोंके		

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥

श्रेयान्, स्वधर्मः, विगुणः, परधर्मात्, स्वनुष्ठितात्,
स्वधर्मे, निधनम्, श्रेयः, परधर्मः, भयावहः॥३५॥

इसलिये उन दोनोंको जीतकर सावधान हुआ स्वधर्मका आचरण करे; क्योंकि—

स्वनुष्ठितात्	= अच्छी प्रकार आचरण किये हुए	श्रेयान्	= अति उत्तम है
परधर्मात्	= दूसरेके धर्मसे	स्वधर्मे	= अपने धर्ममें
विगुणः	= गुणरहित	निधनम्	= मरना (भी)
(अपि)	= भी	श्रेयः	= कल्याणकारक है
स्वधर्मः	= अपना धर्म		(और)
		परधर्मः	= दूसरेका धर्म
		भयावहः	= भयको देनेवाला है

अर्जुन उवाच

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥

अथ, केन, प्रयुक्तः, अयम्, पापम्, चरति, पूरुषः,
अनिच्छन्, अपि, वार्ष्णेय, बलात्, इव, नियोजितः॥३६॥

इसपर अर्जुनने पूछा कि—

वार्ष्णेय	= हे कृष्ण	अथ	= फिर

अयम्	= यह	अपि	= भी
पूरुषः	= पुरुष	केन	= किससे
बलात्	= बलात्कारसे	प्रयुक्तः	= प्रेरा हुआ
नियोजितः	= लगाये हुएके	पापम्	= पापका
इव	= सदृश	चरति	= आचरण करता है
अनिच्छन्	= न चाहता हुआ		

श्रीभगवानुवाच

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

कामः, एषः, क्रोधः, एषः, रजोगुणसमुद्भवः,
महाशनः, महापाप्मा, विद्धि, एनम्, इह, वैरिणम् ॥३७॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण महाराज बोले, हे अर्जुन—

रजोगुण-समुद्भवः	= रजोगुणसे उत्पन्न हुआ		(और)
एषः	= यह	महापाप्मा	= बड़ा पापी है
कामः	= काम (ही)	इह	= इस विषयमें
क्रोधः	= क्रोध है	एनम्	= इसको (ही)
एषः	= यह (ही)		(तूं)
महाशनः	= महाअशन अर्थात् अग्निके सदृश भोगोंसे न तृप्त होनेवाला	वैरिणम्	= वैरी
		विद्धि	= जान

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥

धूमेन, आव्रियते, वह्निः, यथा, आदर्शः, मलेन, च,
यथा,उल्बेन,आवृतः,गर्भः,तथा,तेन,इदम्, आवृतम्॥३८॥

यथा	= जैसे	यथा	= जैसे
धूमेन	= धूएंसे	उल्बेन	= जेरसे
वह्निः	= अग्नि	गर्भः	= गर्भ
च	= और	आवृतः	= ढका हुआ है
मलेन	= मलसे	तथा	= वैसे ही
आदर्शः	= दर्पण	तेन	= उस कामके द्वारा
आव्रियते	= ढका जाता है (तथा)	इदम्	= यह ज्ञान
		आवृतम्	= ढका हुआ है

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥

आवृतम्, ज्ञानम्, एतेन, ज्ञानिनः, नित्यवैरिणा,
कामरूपेण, कौन्तेय, दुष्पूरेण, अनलेन, च॥३९॥

च	= और	दुष्पूरेण	= न पूर्ण होनेवाले
कौन्तेय	= हे अर्जुन	कामरूपेण	= कामरूप
एतेन	= इस	ज्ञानिनः	= ज्ञानियोंके
अनलेन	= अग्नि (सदृश)		

नित्यवैरिणा = नित्य वैरीसे
ज्ञानम् = ज्ञान
आवृतम् = ढका हुआ है

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥

इन्द्रियाणि, मनः, बुद्धिः, अस्य, अधिष्ठानम्, उच्यते,
एतैः, विमोहयति, एषः, ज्ञानम्, आवृत्य, देहिनम् ॥४०॥

तथा—

इन्द्रियाणि = इन्द्रियां
मनः = मन (और)
बुद्धिः = बुद्धि
अस्य = इसके
अधिष्ठानम् = वासस्थान
उच्यते = कहे जाते हैं (और)
एषः = यह (काम)
एतैः = इन (मन, बुद्धि और इन्द्रियों) द्वारा ही
ज्ञानम् = ज्ञानको
आवृत्य = आच्छादित करके (इस)
देहिनम् = जीवात्माको
विमोहयति = मोहित करता है

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥

तस्मात्, त्वम्, इन्द्रियाणि, आदौ, नियम्य, भरतर्षभ,
पाप्मानम्, प्रजहि, हि, एनम्, ज्ञानविज्ञाननाशनम् ॥४१॥

तस्मात	= इसलिये	ज्ञानविज्ञाननाशनम्	= ज्ञान और विज्ञानके नाश करनेवाले
भरतर्षभ	= हे अर्जुन	एनम्	= इस (काम)
त्वम्	= तू	पाप्मानम्	= पापीको
आदौ	= पहिले	हि	= निश्चयपूर्वक
इन्द्रियाणि	= इन्द्रियोंको	प्रजहि	= मार
नियम्य	= वशमें करके		

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥

इन्द्रियाणि, पराणि, आहुः, इन्द्रियेभ्यः, परम्, मनः, मनसः, तु, परा, बुद्धिः, यः, बुद्धेः, परतः, तु, सः ॥४२॥

और यदि तू समझे कि इन्द्रियोंको रोककर कामरूप वैरीको मारनेकी मेरी शक्ति नहीं है तो तेरी यह भूल है; क्योंकि इस शरीरसे तो—

इन्द्रियाणि	= इन्द्रियोंको	परम्	= परे
पराणि	= परे (श्रेष्ठ बलवान् और सूक्ष्म)	मनः	= मन है
आहुः	= कहते हैं (और)	तु	= और
इन्द्रियेभ्यः	= इन्द्रियोंसे	मनसः	= मनसे
		परा	= परे
		बुद्धिः	= बुद्धि है
		तु	= और

यः	= जो	परतः	= अत्यन्त परे है
बुद्धेः	= बुद्धिसे (भी)	सः	= वह (आत्मा है)

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥

एवम्, बुद्धेः, परम्, बुद्ध्वा, संस्तभ्य, आत्मानम्, आत्मना, जहि, शत्रुम्, महाबाहो, कामरूपम्, दुरासदम् ॥ ४३ ॥

एवम्	= इस प्रकार	आत्मानम्	= मनको
बुद्धेः	= बुद्धिसे	संस्तभ्य	= वशमें करके
परम्	= परे अर्थात् सूक्ष्म तथा सब प्रकार बलवान् और श्रेष्ठ अपने आत्माको	महाबाहो	= हे महाबाहो (अपनी शक्तिको समझकर इस)
		दुरासदम्	= दुर्जय
		कामरूपम्	= कामरूप
बुद्ध्वा	= जानकर (और)	शत्रुम्	= शत्रुको
आत्मना	= बुद्धिके द्वारा	जहि	= मार

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्म-
विद्यायां योगशास्त्रे श्रीकृष्णार्जुन-
संवादे कर्मयोगो नाम
तृतीयोऽध्यायः ॥ ३ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

ॐ

श्रीपरमात्मने नमः

अथ चतुर्थोऽध्यायः

श्रीभगवानुवाच

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥

इमम्, विवस्वते, योगम्, प्रोक्तवान्, अहम्, अव्ययम्,
विवस्वान्, मनवे, प्राह, मनुः, इक्ष्वाकवे, अब्रवीत् ॥ १ ॥

इसके उपरान्त श्रीकृष्ण महाराज बोले, हे अर्जुन—

अहम्	= मैंने		(अपने पुत्र)
इमम्	= इस	मनवे	= मनुके प्रति
अव्ययम्	= अविनाशी	प्राह	= कहा (और)
योगम्	= योगको (कल्पके आदिमें)	मनुः	= मनुने
विवस्वते	= सूर्यके प्रति	इक्ष्वाकवे	= (अपने पुत्र) राजा इक्ष्वाकुके प्रति
प्रोक्तवान्	= कहा था (और)	अब्रवीत्	= कहा
विवस्वान्	= सूर्यने		

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥

एवम्, परम्पराप्राप्तम्, इमम्, राजर्षयः, विदुः,
सः, कालेन, इह, महता, योगः, नष्टः, परंतप ॥ २ ॥

एवम्	= इस प्रकार	सः	= वह
परम्परा-प्राप्तम्	= परम्परासे प्राप्त हुए	योगः	= योग
इमम्	= इस (योग) को	महता	= बहुत
राजर्षयः	= राजर्षियोंने	कालेन	= कालसे
विदुः	= जाना (परंतु)	इह	= इस (पृथ्वी) लोकमें
परंतप	= हे अर्जुन	नष्टः	= लोप (प्रायः) हो गया था

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥

सः, एव, अयम्, मया, ते, अद्य, योगः, प्रोक्तः, पुरातनः, भक्तः, असि, मे, सखा, च, इति, रहस्यम्, हि, एतत्, उत्तमम् ॥ ३ ॥

सः	= वह	हि	= क्योंकि (तूं)
एव	= ही	मे	= मेरा
अयम्	= यह	भक्तः	= भक्त
पुरातनः	= पुरातन	च	= और
योगः	= योग	सखा	= प्रिय सखा
अद्य	= अब	असि	= है
मया	= मैंने	इति	= इसलिये (तथा)
ते	= तेरे लिये	एतत्	= यह (योग)
प्रोक्तः	= वर्णन किया है		

उत्तमम् = बहुत उत्तम (और)

रहस्यम् = रहस्य अर्थात् अति मर्मका विषय है

अर्जुन उवाच

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥

अपरम्, भवतः, जन्म, परम्, जन्म, विवस्वतः,
कथम्, एतत्, विजानीयाम्, त्वम्, आदौ, प्रोक्तवान्, इति ॥ ४ ॥

इस प्रकार भगवान् श्रीकृष्णचन्द्र महाराजके वचन सुनकर अर्जुनने पूछा, हे भगवन्—

भवतः = आपका
जन्म = जन्म (तो)
अपर = आधुनिक अर्थात् अब हुआ है (और)
विवस्वतः = सूर्यका
जन्म = जन्म
परम् = बहुत पुराना है (इसलिये)

एतत् = इस योगको (कल्पके)
आदौ = आदिमें
त्वम् = आपने
प्रोक्तवान् = कहा था
इति = यह (मैं)
कथम् = कैसे
विजानीयाम् = जानूं

श्रीभगवानुवाच

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥

बहूनि, मे, व्यतीतानि, जन्मानि, तव, च, अर्जुन,
तानि, अहम्, वेद, सर्वाणि, न, त्वम्, वेत्थ, परंतप ॥ ५ ॥

इसपर श्रीकृष्ण महाराज बोले—

अर्जुन	= हे अर्जुन	परंतप	= हे परंतप
मे	= मेरे	तानि	= उन
च	= और	सर्वाणि	= सबको
तव	= तेरे	त्वम्	= तूं
बहूनि	= बहुतसे	न	= नहीं
जन्मानि	= जन्म	वेत्थ	= जानता है (और)
व्यतीतानि	= हो चुके हैं	अहम्	= मैं
	(परंतु)	वेद	= जानता हूं

अजोऽपि सन्नव्ययात्मा
भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय
संभवाम्यात्ममायया ॥ ६ ॥

अजः, अपि, सन्, अव्ययात्मा, भूतानाम्, ईश्वरः, अपि, सन्,
प्रकृतिम्, स्वाम्, अधिष्ठाय, संभवामि, आत्ममायया ॥ ६ ॥

तथा मेरा जन्म प्राकृत मनुष्योंके सदृश नहीं है—

	(मैं)	अपि	= भी (तथा)
अव्ययात्मा	= अविनाशी-स्वरूप	भूतानाम्	= सब भूत-प्राणियोंका
अजः	= अजन्मा	ईश्वरः	= ईश्वर
सन्	= होनेपर	सन्	= होनेपर

अपि = भी
स्वाम् = अपनी
प्रकृतिम् = प्रकृतिको
अधिष्ठाय = आधीन करके
आत्ममायया = योगमायासे
संभवामि = प्रकट होता हूं

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानंसृजाम्यहम्॥

यदा, यदा, हि, धर्मस्य, ग्लानिः, भवति, भारत,
अभ्युत्थानम्,अधर्मस्य,तदा,आत्मानम्,सृजामि,अहम्॥ ७॥

भारत = हे भारत
यदा = जब
यदा = जब
धर्मस्य = धर्मकी
ग्लानिः = हानि (और)
अधर्मस्य = अधर्मकी
अभ्युत्थानम्= वृद्धि
भवति = होतो है
तदा = तब तब
हि = ही
अहम् = मैं
आत्मानम् = अपने रूपको
सृजामि = रचता हूं अर्थात् प्रकट करता हूं

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

परित्राणाय, साधूनाम्, विनाशाय, च, दुष्कृताम्,
धर्मसंस्थापनार्थाय, संभवामि, युगे, युगे ॥ ८ ॥

क्योंकि–

साधूनाम्	= साधु पुरुषोंका	विनाशाय	= नाश करनेके लिये (तथा)
परित्राणाय	= उद्धार करनेके लिये	धर्मसंस्थापनार्थाय	= धर्म स्थापन करनेके लिये
च	= और	युगे	= युग
दुष्कृताम्	= दूषित कर्म करनेवालोंका	युगे	= युगमें
		संभवामि	= प्रकट होता हूं

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥

जन्म, कर्म, च, मे, दिव्यम्, एवम्, यः, वेत्ति, तत्त्वतः,
त्यक्त्वा, देहम्, पुनः, जन्म, न, एति, माम्, एति, सः, अर्जुन॥ ९॥

इसलिये–

अर्जुन	= हे अर्जुन	दिव्यम्	= दिव्य अर्थात् अलौकिक है
मे	= मेरा (वह)	एवम्	= इस प्रकार
जन्म	= जन्म	यः	= जो पुरुष
च	= और	तत्त्वतः	= तत्त्वसे*
कर्म	= कर्म		

* सर्वशक्तिमान् सच्चिदानन्दघन परमात्मा अज, अविनाशी और सर्वभूतोंके परम गति तथा परम आश्रय हैं। वे केवल धर्मको स्थापन करने और संसारका उद्धार करनेके लिये ही अपनी योगमायासे सगुणरूप

वेत्ति	=जानता है	न	=नहीं
सः	=वह	एति	=प्राप्त होता है
देहम्	=शरीरको		(किंतु)
त्यक्त्वा	=त्यागकर	माम्	=मुझे
पुनः	=फिर		(ही)
जन्म	=जन्मको	एति	=प्राप्त होता है

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥

वीतरागभयक्रोधाः, मन्मयाः, माम्, उपाश्रिताः,
बहवः, ज्ञानतपसा, पूताः, मद्भावम्, आगताः ॥१०॥

और हे अर्जुन ! पहिले भी—

वीतराग-भयक्रोधाः	=राग भय और क्रोधसे रहित	उपाश्रिताः	=शरण हुए
		बहवः	=बहुत-से पुरुष
		ज्ञानतपसा	=ज्ञानरूप तपसे
मन्मयाः	=अनन्यभावसे मेरेमें स्थिति-वाले	पूताः	=पवित्र हुए
		मद्भावम्	=मेरे स्वरूपको
माम्	=मेरे	आगताः	=प्राप्त हो चुके हैं

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

होकर प्रकट होते हैं इसलिये परमेश्वरके समान सुहृद्, प्रेमी और तितपावन दूसरा कोई नहीं है ऐसा समझकर जो पुरुष परमेश्वरका अनन्य प्रेमसे निरन्तर चिन्तन करता हुआ आसक्तिरहित संसारमें बर्तता है, वही उनको तत्त्वसे जानता है ।

ये, यथा, माम्, प्रपद्यन्ते, तान्, तथा, एव, भजामि, अहम्,
मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः ॥११॥

क्योंकि–

पार्थ	= हे अर्जुन	भजामि	= भजता हूं (इस रहस्यको जानकर ही)
ये	= जो	मनुष्याः	= बुद्धिमान् मनुष्यगण
माम्	= मेरेको	सर्वशः	= सब प्रकारसे
यथा	= जैसे	मम	= मेरे
प्रपद्यन्ते	= भजते हैं	वर्त्म	= मार्गके
अहम्	= मैं (भी)	अनुवर्तन्ते	= अनुसार बर्तते हैं
तान्	= उनको		
तथा	= वैसे		
एव	= ही		

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥

काङ्क्षन्तः, कर्मणाम्, सिद्धिम्, यजन्ते, इह, देवताः,
क्षिप्रम्, हि, मानुषे, लोके, सिद्धिः, भवति, कर्मजा ॥१२॥

और जो मेरेको तत्त्वसे नहीं जानते हैं, वे पुरुष–

इह	= इस	देवताः	= देवताओंको
मानुषे	= मनुष्य	यजन्ते	= पूजते हैं (और उनके)
लोके	= लोकमें	कर्मजा	= कर्मोंसे उत्पन्न हुई
कर्मणाम्	= कर्मोंके		
सिद्धिम्	= फलको		
काङ्क्षन्तः	= चाहते हुए		

सिद्धिः	=सिद्धि (भी)	हि	=ही
क्षिप्रम्	=शीघ्र	भवति	=होती है

परंतु उनको मेरी प्राप्ति नहीं होती इसलिये तूं मेरेको ही सब प्रकारसे भज।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥

चातुर्वर्ण्यम्, मया, सृष्टम्, गुणकर्मविभागशः,
तस्य, कर्तारम्, अपि, माम्, विद्धि, अकर्तारम्, अव्ययम्॥ १३॥

तथा हे अर्जुन—

गुणकर्म-विभागशः	=गुण और कर्मोंके विभागसे	तस्य	=उनके
		कर्तारम्	=कर्ताको
		अपि	=भी
चातुर्वर्ण्यम्	=ब्राह्मण क्षत्रिय वैश्य और शूद्र	माम्	=मुझ
		अव्ययम्	=अविनाशी परमेश्वरको (तूं)
मया	=मेरे द्वारा	अकर्तारम्	=अकर्ता (ही)
सृष्टम्	=रचे गये हैं	विद्धि	=जान

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥

न, माम्, कर्माणि, लिम्पन्ति, न, मे, कर्मफले, स्पृहा,
इति, माम्, यः, अभिजानाति, कर्मभिः, न, सः, बध्यते॥ १४॥

क्योंकि —

कर्मफले	=कर्मोंके फलमें	इति	=इस प्रकार
मे	=मेरी	यः	=जो
स्पृहा	=स्पृहा	माम्	=मेरेको
न	=नहीं है (इसलिये)	अभिजानाति	=तत्त्वसे जानता है
माम्	=मेरेको	सः	=वह (भी)
कर्माणि	=कर्म	कर्मभिः	=कर्मोंसे
न लिम्पन्ति	=लिपायमान नहीं करते	न बध्यते	=नहीं बंधता है

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥

एवम्, ज्ञात्वा, कृतम्, कर्म, पूर्वैः, अपि, मुमुक्षुभिः,
कुरु, कर्म, एव, तस्मात्, त्वम्, पूर्वैः, पूर्वतरम्, कृतम् ॥१५॥

तथा—

पूर्वैः	=पहिले होनेवाले	तस्मात्	=इससे
मुमुक्षुभिः	=मुमुक्षु पुरुषों-द्वारा	त्वम्	=तूं (भी)
अपि	=भी	पूर्वैः	=पूर्वजोंद्वारा
एवम्	=इस प्रकार	पूर्वतरम् कृतम्	=सदासे किये हुए
ज्ञात्वा	=जानकर (ही)	कर्म	=कर्मको
कर्म	=कर्म	एव	=ही
कृतम्	=किया गया है	कुरु	=कर

किं कर्म किमकर्मेति
कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि
यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१६॥

किम्, कर्म, किम्, अकर्म, इति, कवयः, अपि, अत्र, मोहिताः, तत्, ते, कर्म, प्रवक्ष्यामि, यत्, ज्ञात्वा, मोक्ष्यसे, अशुभात्॥१६॥

परंतु—

कर्म	= कर्म	कर्म	= कर्म अर्थात् कर्मोंका तत्त्व
किम्	= क्या है (और)	ते	= तेरे लिये
अकर्म	= अकर्म	प्रवक्ष्यामि	= अच्छी प्रकार कहूंगा (कि)
किम्	= क्या है	यत्	= जिसको
इति	= ऐसे	ज्ञात्वा	= जानकर (तूं)
अत्र	= इस विषयमें	अशुभात्	= अशुभ अर्थात् संसारबन्धनसे
कवयः	= बुद्धिमान् पुरुष	मोक्ष्यसे	= छूट जायगा
अपि	= भी		
मोहिताः	= मोहित हैं (इसलिये मैं)		
तत्	= वह		

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥

कर्मणः, हि, अपि, बोद्धव्यम्, बोद्धव्यम्, च, विकर्मणः, अकर्मणः, च, बोद्धव्यम्, गहना, कर्मणः, गतिः॥१७॥

कर्मणः	=कर्मका स्वरूप	विकर्मणः	=निषिद्ध कर्मका स्वरूप (भी)
अपि	=भी	बोद्धव्यम्	=जानना चाहिये
बोद्धव्यम्	=जानना चाहिये	हि	=क्योंकि
च	=और	कर्मणः	=कर्मकी
अकर्मणः	=अकर्मका स्वरूप (भी)	गतिः	=गति
बोद्धव्यम्	=जानना चाहिये	गहना	=गहन है
च	=तथा		

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥

कर्मणि, अकर्म, यः, पश्येत्, अकर्मणि, च, कर्म, यः, सः, बुद्धिमान्, मनुष्येषु, सः, युक्तः, कृत्स्नकर्मकृत्॥१८॥

यः	=जो पुरुष	यः	=जो पुरुष
कर्मणि	=कर्ममें अर्थात् अहंकाररहित की हुई संपूर्ण चेष्टाओंमें	अकर्मणि	=अकर्ममें अर्थात् अज्ञानी पुरुष-द्वारा किये हुए संपूर्णक्रियाओंके त्यागमें (भी)
अकर्म	=अकर्म अर्थात् वास्तवमें उनका न होनापना	कर्म	=कर्मको अर्थात् त्यागरूप क्रियाको देखे
पश्येत्	=देखे	सः	=वह पुरुष
च	=और		

मनुष्येषु = मनुष्योंमें
बुद्धिमान् = बुद्धिमान् है
(और)
सः = वह
युक्तः = योगी
कृत्स्न-कर्मकृत् = संपूर्ण कर्मोंका करनेवाला है

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥

यस्य, सर्वे, समारम्भाः, कामसंकल्पवर्जिताः, ज्ञानाग्निदग्धकर्माणम्, तम्, आहुः, पण्डितम्, बुधाः॥१९॥

और हे अर्जुन—

यस्य = जिसके
सर्वे = संपूर्ण
समारम्भाः = कार्य
कामसंकल्प-वर्जिताः = कामना और संकल्पसे रहित हैं (ऐसे)
तम् = उस
ज्ञानाग्नि-दग्ध-कर्माणम् = ज्ञानरूप अग्निद्वारा भस्म हुए कर्मोंवाले पुरुषको
बुधाः = ज्ञानीजन (भी)
पण्डितम् = पण्डित
आहुः = कहते हैं

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः॥

त्यक्त्वा, कर्मफलासङ्गम्, नित्यतृप्तः, निराश्रयः, कर्मणि, अभिप्रवृत्तः, अपि, न, एव, किंचित्, करोति, सः॥२०॥

और जो पुरुष—

निराश्रयः = सांसारिक आश्रयसे रहित
नित्य-तृप्तः = सदा परमानन्द परमात्मामें तृप्त है

सः	= वह	अभिप्रवृत्तः	= अच्छी प्रकार बर्तता हुआ
कर्म-फलासङ्गम्	= कर्मोंके फल और सङ्ग अर्थात् कर्तृत्व अभिमानको	अपि	= भी
		किंचित्	= कुछ
		एव	= भी
त्यक्त्वा	= त्यागकर	न	= नहीं
कर्मणि	= कर्ममें	करोति	= करता है

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

निराशीः, यतचित्तात्मा, त्यक्तसर्वपरिग्रहः, शारीरम्, केवलम्, कर्म, कुर्वन्, न, आप्नोति, किल्बिषम् ॥ २१ ॥

और–

यत-चित्तात्मा	= जीत लिया है अन्तःकरण और शरीर जिसने (तथा)	केवलम्	= केवल
		शारीरम्	= शरीरसम्बन्धी
		कर्म	= कर्मको
त्यक्तसर्व-परिग्रहः	= त्याग दी है संपूर्ण भोगोंकी सामग्री जिसने (ऐसा)	कुर्वन्	= करता हुआ (भी)
		किल्बिषम्	= पापको
निराशीः	= आशारहित पुरुष	न	= नहीं
		आप्नोति	= प्राप्त होता है

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

यदृच्छालाभसंतुष्टः, द्वन्द्वातीतः, विमत्सरः,
समः, सिद्धौ, असिद्धौ, च, कृत्वा, अपि, न, निबध्यते ॥ २२ ॥

और—

यदृच्छालाभसंतुष्टः = अपने आप जो कुछ आ प्राप्त हो उसमें ही संतुष्ट रहनेवाला (और)
द्वन्द्वातीतः = हर्षशोकादि द्वन्द्वोंसे अतीत हुआ (तथा)
विमत्सरः = मत्सरता अर्थात् ईर्षासे रहित
सिद्धौ = सिद्धि
च = और
असिद्धौ = असिद्धिमें
समः = समत्वभाववाला पुरुष (कर्मोंको)
कृत्वा = करके
अपि = भी
न = नहीं
निबध्यते = बंधता है

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥

गतसङ्गस्य, मुक्तस्य, ज्ञानावस्थितचेतसः,
यज्ञाय, आचरतः, कर्म, समग्रम्, प्रविलीयते ॥ २३ ॥

क्योंकि—

गतसङ्गस्य	= आसक्तिसे रहित	आचरतः	= आचरण करते हुए
ज्ञानावस्थित-चेतसः	= ज्ञानमें स्थित हुए चित्तवाले	मुक्तस्य	= मुक्त पुरुषके
		समग्रम्	= संपूर्ण
		कर्म	= कर्म
यज्ञाय	= यज्ञके लिये	प्रविलीयते	= नष्ट हो जाते हैं

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

ब्रह्म, अर्पणम्, ब्रह्म, हविः, ब्रह्माग्नौ, ब्रह्मणा, हुतम्,
ब्रह्म, एव, तेन, गन्तव्यम्, ब्रह्मकर्मसमाधिना ॥२४॥

उन यज्ञके लिये आचरण करनेवाले पुरुषोंमेंसे कोई तो इस भावसे यज्ञ करते हैं कि—

अर्पणम्	= अर्पण अर्थात् स्रुवादिक (भी)	हुतम्	= (जो) हवन किया गया है
ब्रह्म	= ब्रह्म है (और)		(वह भी ब्रह्म ही है इसलिये)
हविः	= हवि अर्थात् हवन करने योग्य द्रव्य (भी)	ब्रह्मकर्म-समाधिना	= ब्रह्मरूप कर्ममें समाधिस्थ हुए
ब्रह्म	= ब्रह्म है (और)	तेन	= उस पुरुषद्वारा
ब्रह्माग्नौ	= ब्रह्मरूप अग्निमें	गन्तव्यम्	= (जो) प्राप्त होने योग्य है
ब्रह्मणा	= ब्रह्मरूप कर्ताके द्वारा		

(वह भी)

ब्रह्म	=ब्रह्म	एव	=ही है

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥

दैवम्, एव, अपरे, यज्ञम्, योगिनः, पर्युपासते,
ब्रह्माग्नौ, अपरे, यज्ञम्, यज्ञेन, एव, उपजुह्वति ॥२५॥

और—

अपरे	=दूसरे	अपरे	=दूसरे (ज्ञानीजन)
योगिनः	=योगीजन	ब्रह्माग्नौ	=परब्रह्म परमात्मारूप अग्निमें
दैवम्	=देवताओंके पूजनरूप	यज्ञेन	=यज्ञके द्वारा
यज्ञम्	=यज्ञको	एव	=ही
एव	=ही	यज्ञम्	=यज्ञको
पर्युपासते	=अच्छी प्रकार उपासते हैं अर्थात् करते हैं	उपजुह्वति	=हवन*करते हैं

(और)

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥

श्रोत्रादीनि, इन्द्रियाणि, अन्ये, संयमाग्निषु, जुह्वति,
शब्दादीन्, विषयान्, अन्ये, इन्द्रियाग्निषु, जुह्वति ॥२६॥

---

* परब्रह्म परमात्मामें ज्ञानद्वारा एकीभावसे स्थित होना ही ब्रह्मरूप अग्निमें यज्ञके द्वारा यज्ञको हवन करना है ।

और—

अन्ये	= अन्य योगीजन	अन्ये	= और दूसरे योगीलोग
श्रोत्रादीनि	= श्रोत्रादिक	शब्दादीन्	= शब्दादिक
इन्द्रियाणि	= सब इन्द्रियोंको	विषयान्	= विषयोंको
संयमाग्निषु	= संयम अर्थात् स्वाधीनतारूप अग्निमें	इन्द्रियाग्निषु	= इन्द्रियरूप अग्निमें
जुह्वति	= हवन करते हैं अर्थात् इन्द्रियोंको विषयोंसे रोककर अपने वशमें कर लेते हैं	जुह्वति	= हवन करते हैं अर्थात् रागद्वेषरहित इन्द्रियोंद्वारा विषयोंको ग्रहण करते हुए भी भस्मरूप करते हैं

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥

सर्वाणि, इन्द्रियकर्माणि, प्राणकर्माणि, च, अपरे, आत्मसंयमयोगाग्नौ, जुह्वति, ज्ञानदीपिते ॥२७॥

और—

अपरे	= दूसरे योगीजन	प्राणकर्माणि	= प्राणोंके व्यापारको
सर्वाणि	= संपूर्ण		
इन्द्रियकर्माणि	= इन्द्रियोंकी चेष्टाओंको	ज्ञानदीपिते	= ज्ञानसे प्रकाशित हुई
च	= तथा		

आत्मसंयम-योगाग्नौ = परमात्मामें स्थितिरूप योगाग्निमें | जुह्वति = हवन करते हैं*

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥

द्रव्ययज्ञाः, तपोयज्ञाः, योगयज्ञाः, तथा, अपरे, स्वाध्यायज्ञानयज्ञाः, च, यतयः, संशितव्रताः ॥२८॥

और—

अपरे = दूसरे (कई पुरुष)

द्रव्ययज्ञाः = ईश्वर-अर्पण बुद्धिसे लोकसेवामें द्रव्य लगानेवाले हैं

तथा = वैसे ही (कई पुरुष)

तपोयज्ञाः = स्वधर्मपालनरूप तपयज्ञको करनेवाले हैं (और कई)

योगयज्ञाः = अष्टाङ्गयोगरूप यज्ञको करनेवाले हैं

च = और (दूसरे)

संशितव्रताः = अहिंसादि तीक्ष्ण व्रतोंसे युक्त

यतयः = यत्नशील पुरुष

स्वाध्यायज्ञानयज्ञाः = भगवान्‌के नामका जप तथा भगवत्-प्राप्तिविषयक शास्त्रोंका अध्ययनरूप ज्ञानयज्ञके करनेवाले हैं

* सच्चिदानन्दघन परमात्माके सिवाय अन्य किसीका भी न चिन्तन करना ही उन सबका हवन करना है ।

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥

अपाने, जुह्वति, प्राणम्, प्राणे, अपानम्, तथा, अपरे,
प्राणापानगती, रुद्ध्वा, प्राणायामपरायणाः ॥२९॥

और दूसरे योगीजन—

अपाने	= अपानवायुमें	अपरे	= अन्य योगीजन
प्राणम्	= प्राणवायुको	प्राणापान-गती	= प्राण और अपानकी गतिको
जुह्वति	= हवन करते हैं		
तथा	= वैसे ही (अन्य योगीजन)	रुद्ध्वा	= रोककर
प्राणे	= प्राणवायुमें	प्राणायाम-परायणाः	= प्राणयामके परायण
अपानम्	= अपानवायुको		
(जुह्वति)	= हवन करते हैं (तथा)		(होते हैं)

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥

अपरे, नियताहाराः, प्राणान्, प्राणेषु, जुह्वति,
सर्वे, अपि, एते, यज्ञविदः, यज्ञक्षपितकल्मषाः ॥३०॥

और—

अपरे	= दूसरे	नियताहाराः	= नियमित आहार*करने-वाले योगीजन

* गीता अध्याय ६ श्लोक १७ में देखना चाहिये ।

प्राणान् = प्राणोंको
प्राणेषु = प्राणोंमें ही
जुह्वति = हवन करते हैं
(इस प्रकार)
यज्ञक्षपित-कल्मषाः = यज्ञोंद्वारा नाश हो गया है पाप जिनका (ऐसे)
एते = यह
सर्वे = सब
अपि = ही
(पुरुष)
यज्ञविदः = यज्ञोंको जानने-वाले हैं

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम

यज्ञशिष्टामृतभुजः, यान्ति, ब्रह्म, सनातनम्, न, अयम्, लोकः, अस्ति, अयज्ञस्य, कुतः, अन्यः, कुरुसत्तम ३१

और—

कुरुसत्तम = हे कुरुश्रेष्ठ अर्जुन
यज्ञ-शिष्टामृत-भुजः = यज्ञोंके परिणामरूप ज्ञानामृतको भोगनेवाले योगीजन
सनातनम् = सनातन
ब्रह्म = परब्रह्म परमात्माको
यान्ति = प्राप्त होते हैं
(और)
अयज्ञस्य = यज्ञरहित पुरुषको
अयम् = यह
लोकः = मनुष्यलोक
(भी सुखदायक)
न = नहीं
अस्ति = है
(फिर)
अन्यः = परलोक
कुतः = कैसे
(सुखदायक होगा)

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥

एवम्, बहुविधाः, यज्ञाः, विततताः, ब्रह्मणः, मुखे,
कर्मजान्, विद्धि, तान्, सर्वान्, एवम्, ज्ञात्वा, विमोक्ष्यसे ॥३ २॥

एवम् = ऐसे
बहुविधाः = बहुत प्रकारके
यज्ञाः = यज्ञ
ब्रह्मणः = वेदकी
मुखे = वाणीमें
विततताः = विस्तार किये गये हैं
तान् = उन
सर्वान् = सबको
कर्मजान् = शरीर मन और इन्द्रियोंकी क्रियाद्वारा ही उत्पन्न होनेवाले
विद्धि = जान
एवम् = इस प्रकार (तत्त्वसे)
ज्ञात्वा = जानकर (निष्काम कर्मयोगद्वारा)
विमोक्ष्यसे = संसार-बन्धनसे मुक्त हो जायगा

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥

श्रेयान्, द्रव्यमयात्, यज्ञात्, ज्ञानयज्ञः, परंतप,
सर्वम्, कर्म, अखिलम्, पार्थ, ज्ञाने, परिसमाप्यते ॥३ ३॥

और—

परंतप = हे अर्जुन
द्रव्यमयात् = सांसारिक वस्तुओंसे सिद्ध होनेवाले
यज्ञात् = यज्ञसे
ज्ञानयज्ञः = ज्ञानरूप यज्ञ (सब प्रकार)
श्रेयान् = श्रेष्ठ है (क्योंकि)
पार्थ = हे पार्थ
सर्वम् = संपूर्ण
अखिलम् = यावन्मात्र
कर्म = कर्म
ज्ञाने = ज्ञानमें
परिसमाप्यते = शेष होते हैं अर्थात् ज्ञान उनकी पराकाष्ठा है

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥

तत्, विद्धि, प्रणिपातेन, परिप्रश्नेन, सेवया, उपदेक्ष्यन्ति, ते, ज्ञानम्, ज्ञानिनः, तत्त्वदर्शिनः ॥३४॥

इसलिये तत्त्वको जाननेवाले ज्ञानी पुरुषोंसे—

प्रणिपातेन = भली प्रकार दण्डवत् प्रणाम (तथा)
सेवया = सेवा (और)
परिप्रश्नेन = निष्कपट भावसे किये हुए प्रश्नद्वारा
तत् = उस ज्ञानको
विद्धि = जान
ते = वे
तत्त्वदर्शिनः = मर्मको जाननेवाले
ज्ञानिनः = ज्ञानीजन (तुझे उस)
ज्ञानम् = ज्ञानका
उपदेक्ष्यन्ति = उपदेश करेंगे

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥

यत्, ज्ञात्वा, न, पुनः, मोहम्, एवम्, यास्यसि, पाण्डव, येन, भूतानि, अशेषेण, द्रक्ष्यसि, आत्मनि, अथो, मयि ॥ ३५ ॥

कि—

यत्	= जिसको	आत्मनि	= अपने अन्तर्गत समष्टि बुद्धिके आधार
ज्ञात्वा	= जानकर (तूं)	अशेषेण	= संपूर्ण
पुनः	= फिर	भूतानि	= भूतोंको
एवम्	= इस प्रकार	द्रक्ष्यसि	= देखेगा* (और)
मोहम्	= मोहको	अथो	= उसके उपरान्त
न	= नहीं	मयि	= मेरेमें अर्थात् सच्चिदानन्द-स्वरूपमें एकीभाव हुआ सच्चिदानन्दमय ही देखेगा†
यास्यसि	= प्राप्त होगा (और)		
पाण्डव	= हे अर्जुन		
येन	= जिस ज्ञानके द्वारा (सर्वव्यापी अनन्त चेतन-रूप हुआ)		

* गीता अध्याय ६ श्लोक २९ में देखना चाहिये ।

† गीता अध्याय ६ श्लोक ३० में देखना चाहिये ।

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥

अपि, चेत्, असि, पापेभ्यः, सर्वेभ्यः, पापकृत्तमः,
सर्वम्, ज्ञानप्लवेन, एव, वृजिनम्, संतरिष्यसि ॥३६॥

और—

चेत् = यदि (तू)
सर्वेभ्यः = सब
पापेभ्यः = पापियोंसे
अपि = भी
पापकृत्तमः = अधिक पाप करनेवाला
असि = है (तो भी)
ज्ञानप्लवेन = ज्ञानरूप नौकाद्वारा
एव = निःसन्देह
सर्वम् = संपूर्ण
वृजिनम् = पापोंको
संतरिष्यसि = अच्छी प्रकार तर जायगा

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥

यथा, एधांसि, समिद्धः, अग्निः, भस्मसात्, कुरुते, अर्जुन,
ज्ञानाग्निः, सर्वकर्माणि, भस्मसात्, कुरुते, तथा ॥३७॥

क्योंकि—

अर्जुन = हे अर्जुन
यथा = जैसे
समिद्धः = प्रज्वलित
अग्निः = अग्नि
एधांसि = इन्धनको
भस्मसात् = भस्ममय
कुरुते = कर देता है
तथा = वैसे ही

ज्ञानाग्निः	= ज्ञानरूप अग्नि	भस्मसात्	= भस्ममय
सर्वकर्माणि	= संपूर्ण कर्मोंको	कुरुते	= कर देता है

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

न, हि, ज्ञानेन, सदृशम्, पवित्रम्, इह, विद्यते,
तत्, स्वयम्, योगसंसिद्धः, कालेन, आत्मनि, विन्दति ॥ ३८ ॥

इसलिये—

इह	= इस संसारमें	कालेन	= कितनेक कालसे
ज्ञानेन	= ज्ञानके	स्वयम्	= अपने आप
सदृशम्	= समान	योग-संसिद्धः	= समत्वबुद्धिरूप योगके द्वारा अच्छी प्रकार शुद्धान्तःकरण हुआ पुरुष
पवित्रम्	= पवित्र करनेवाला		
हि	= निःसन्देह (कुछ भी)		
न	= नहीं		
विद्यते	= है	आत्मनि	= आत्मामें
तत्	= उस ज्ञानको	विन्दति	= अनुभव करता है

श्रद्धावाँल्लभते ज्ञानं
तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्ति-
मचिरेणाधिगच्छति ॥३९॥

श्रद्धावान्, लभते, ज्ञानम्, तत्परः, संयतेन्द्रियः,
ज्ञानम्,लब्ध्वा,पराम्,शान्तिम्,अचिरेण,अधिगच्छति ॥३९॥

और हे अर्जुन—

संयतेन्द्रियः= जितेन्द्रिय
तत्परः = तत्पर हुआ
श्रद्धावान् = श्रद्धावान् पुरुष
ज्ञानम् = ज्ञानको
लभते = प्राप्त होता है
ज्ञानम् = ज्ञानको
लब्ध्वा = प्राप्त होकर
अचिरेण = तत्क्षण (भगवत्-प्राप्तिरूप)
पराम् = परम
शान्तिम् = शान्तिको
अधिगच्छति = प्राप्त हो जाता है

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥

अज्ञः, च, अश्रद्दधानः, च, संशयात्मा, विनश्यति,
न,अयम्,लोकः,अस्ति,न,परः,न,सुखम्, संशयात्मनः ॥४०॥

और हे अर्जुन—

अज्ञः = भगवत्-विषयको न जाननेवाला
च = तथा
अश्रद्दधानः = श्रद्धारहित
च = और
संशयात्मा = संशययुक्त पुरुष
विनश्यति = परमार्थसे भ्रष्ट हो जाता है (उनमें भी)
संशयात्मनः = संशययुक्त पुरुषके लिये तो

न	= न	परः	= परलोक
सुखम्	= सुख है (और)	अस्ति	= है अर्थात् यह लोक और परलोक दोनों ही उसके लिये भ्रष्ट हो जाते हैं
न	= न		
अयम्	= यह		
लोकः	= लोक है		
न	= न		

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥

योगसंन्यस्तकर्माणम्, ज्ञानसंछिन्नसंशयम्,
आत्मवन्तम्, न, कर्माणि, निबध्नन्ति, धनंजय ॥४१॥

और—

धनंजय	= हे धनंजय	ज्ञान-संछिन्न-संशयम्	= ज्ञानद्वारा नष्ट हो गये हैं सब संशय जिसके ऐसे
योग-संन्यस्त-कर्माणम्	= समबुद्धिरूप योगद्वारा भगवत्-अर्पण कर दिये हैं संपूर्ण कर्म जिसने	आत्मवन्तम्	= परमात्म-परायण पुरुषको
	(और)	कर्माणि	= कर्म
		न	= नहीं
		निबध्नन्ति	= बांधते हैं

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥

तस्मात्, अज्ञानसंभूतम्, हृत्स्थम्, ज्ञानासिना, आत्मनः, छित्त्वा,एनम्,संशयम्,योगम्,आतिष्ठ, उत्तिष्ठ,भारत ॥४२॥

तस्मात् = इससे

भारत = हे भरतवंशी अर्जुन (तूं)

योगम् = समत्वबुद्धिरूप योगमें

आतिष्ठ = स्थित हो

(और)

अज्ञान-संभूतम् = अज्ञानसे उत्पन्न हुए

हृत्स्थम् = हृदयमें स्थित

एनम् = इस

आत्मनः = अपने

संशयम् = संशयको

ज्ञानासिना = ज्ञानरूप तलवारद्वारा

छित्त्वा = छेदन करके

(युद्धके लिये)

उत्तिष्ठ = खड़ा हो

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-संवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्रविषयक श्रीकृष्ण और अर्जुनके संवादमें "ज्ञानकर्मसंन्यासयोग" नामक चौथा अध्याय ॥ ४ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

ॐ

श्रीपरमात्मने नमः

अथ पञ्चमोऽध्यायः

अर्जुन उवाच

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥

संन्यासम्, कर्मणाम्, कृष्ण, पुनः, योगम्, च, शंससि, यत्, श्रेयः, एतयोः, एकम्, तत्, मे, ब्रूहि, सुनिश्चितम् ॥ १ ॥

उसके उपरान्त अर्जुनने पूछा—

कृष्ण	= हे कृष्ण (आप)	एतयोः	= इन दोनोंमें
कर्मणाम्	= कर्मोंके	एकम्	= एक
संन्यासम्	= संन्यासकी	यत्	= जो
च	= और	सुनिश्चितम्	= निश्चय किया हुआ
पुनः	= फिर	श्रेयः	= कल्याणकारक (होवे)
योगम्	= निष्काम कर्मयोगकी	तत्	= उसको
शंससि	= प्रशंसा करते हो (इसलिये)	मे	= मेरे लिये
		ब्रूहि	= कहिये

श्रीभगवानुवाच

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥

उभयोः	= दोनोंके		
फलम्	= फलरूप परमात्माको	विन्दते	= प्राप्त होता है

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति॥

यत्, सांख्यैः, प्राप्यते, स्थानम्, तत्, योगैः, अपि, गम्यते, एकम्, सांख्यम्, च, योगम्, च, यः, पश्यति, सः, पश्यति॥५॥

तथा—

सांख्यैः	= ज्ञानयोगियोंद्वारा	यः	= जो (पुरुष)
यत्	= जो	सांख्यम्	= ज्ञानयोग
स्थानम्	= परमधाम	च	= और
प्राप्यते	= प्राप्त किया जाता है	योगम्	= निष्काम कर्मयोगको (फलरूपसे)
योगैः	= निष्काम कर्मयोगियोंद्वारा	एकम्	= एक
अपि	= भी	पश्यति	= देखता है
तत्	= वही	सः	= वह
गम्यते	= प्राप्त किया जाता है (इसलिये)	च	= ही (यथार्थ)
		पश्यति	= देखता है

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥

संन्यासः, तु, महाबाहो, दुःखम्, आप्तुम्, अयोगतः,
योगयुक्तः, मुनिः, ब्रह्म, नचिरेण, अधिगच्छति ॥ ६ ॥

तु = परन्तु
महाबाहो = हे अर्जुन
अयोगतः = निष्काम कर्म-योगके बिना
संन्यासः = संन्यास अर्थात् मन इन्द्रियों और शरीरद्वारा होनेवाले संपूर्ण कर्मोंमें कर्ता-पनका त्याग
आप्तुम् = प्राप्त होना
दुःखम् = कठिन है (और)
मुनिः = भगवत्-स्वरूपको मनन करनेवाला
योगयुक्तः = निष्काम कर्मयोगी
ब्रह्म = परब्रह्म परमात्माको
नचिरेण = शीघ्र ही
अधिगच्छति = प्राप्त हो जाता है

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥

योगयुक्तः, विशुद्धात्मा, विजितात्मा, जितेन्द्रियः,
सर्वभूतात्मभूतात्मा, कुर्वन्, अपि, न, लिप्यते ॥ ७ ॥

तथा—

विजितात्मा = वशमें किया हुआ है शरीर जिसके ऐसा
जितेन्द्रियः = जितेन्द्रिय (और)
विशुद्धात्मा = विशुद्ध अन्तःकरणवाला

(एवं)

सर्व-भूतात्म-भूतात्मा = संपूर्ण प्राणियोंके आत्मरूप परमात्मामें एकीभाव हुआ

योगयुक्तः = निष्काम कर्मयोगी

कुर्वन् = कर्म करता हुआ

अपि = भी

न लिप्यते = लिपायमान नहीं होता

नैव किंचित्करोमीति
युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्र-
न्नश्नन्गच्छन्स्वपञ्श्वसन् ॥८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥

न, एव, किंचित्, करोमि, इति, युक्तः, मन्येत, तत्त्ववित्, पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्, प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन्, अपि, इन्द्रियाणि, इन्द्रियार्थेषु, वर्तन्ते, इति, धारयन् ॥ ८-९ ॥

और हे अर्जुन—

तत्त्ववित् = तत्त्वको जाननेवाला

युक्तः = सांख्ययोगी तो

पश्यन् = देखता हुआ

शृण्वन् = सुनता हुआ

स्पृशन् = स्पर्श करता हुआ

जिघ्रन् = सूंघता हुआ

अश्नन्	= भोजन करता हुआ	अपि	= भी
		इन्द्रियाणि	= सब इन्द्रियां
गच्छन्	= गमन करता हुआ	इन्द्रियार्थेषु	= अपने अपने अर्थोंमें
स्वपन्	= सोता हुआ	वर्तन्ते	= बर्त रही हैं
श्वसन्	= श्वास लेता हुआ	इति	= इस प्रकार
प्रलपन्	= बोलता हुआ	धारयन्	= समझता हुआ
विसृजन्	= त्यागता हुआ	एव	= निःसन्देह
गृह्णन्	= ग्रहण करता हुआ (तथा)	इति	= ऐसे
		मन्येत	= माने कि (मैं)
उन्मिषन्	= आंखोंको खोलता (और)	किंचित्	= कुछ भी
		न	= नहीं
निमिषन्	= मीचता हुआ	करोमि	= करता हूं

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

ब्रह्मणि, आधाय, कर्माणि, सङ्गम्, त्यक्त्वा, करोति, यः, लिप्यते, न, सः, पापेन, पद्मपत्रम्, इव, अम्भसा ॥१०॥

परन्तु हे अर्जुन ! देहाभिमानियोंद्वारा यह साधन होना कठिन है और निष्काम कर्मयोग सुगम है; क्योंकि—

यः	= जो पुरुष	आधाय	= अर्पण करके (और)
कर्माणि	= सब कर्मोंको		
ब्रह्मणि	= परमात्मामें	सङ्गम्	= आसक्तिको

त्यक्त्वा	= त्यागकर	इव	= सदृश
करोति	= कर्म करता है	पापेन	= पापसे
सः	= वह पुरुष		
अम्भसा	= जलसे	न	= लिपायमान नहीं होता
पद्मपत्रम्	= कमलके पत्तेकी	लिप्यते	

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥

कायेन, मनसा, बुद्ध्या, केवलैः, इन्द्रियैः, अपि,
योगिनः, कर्म, कुर्वन्ति, सङ्गम्, त्यक्त्वा, आत्मशुद्धये ॥ ११॥

इसलिये—

योगिनः	= निष्काम कर्मयोगी (ममत्वबुद्धिरहित)	अपि	= भी
		सङ्गम्	= आसक्तिको
केवलैः	= केवल	त्यक्त्वा	= त्यागकर
इन्द्रियैः	= इन्द्रिय	आत्म- शुद्धये	= अन्तःकरणकी शुद्धिके लिये
मनसा	= मन		
बुद्ध्या	= बुद्धि (और)	कर्म	= कर्म
कायेन	= शरीरद्वारा	कुर्वन्ति	= करते हैं

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥

युक्तः, कर्मफलम्, त्यक्त्वा, शान्तिम्, आप्नोति, नैष्ठिकीम्,
अयुक्तः, कामकारेण, फले, सक्तः, निबध्यते ॥१२॥

इसीसे—

युक्तः = निष्काम कर्मयोगी
कर्मफलम् = कर्मोंके फलको
त्यक्त्वा = परमेश्वरके अर्पण करके
नैष्ठिकीम् = भगवत्-प्राप्तिरूप
शान्तिम् = शान्तिको
आप्नोति = प्राप्त होता है
(और)
अयुक्तः = सकामी पुरुष
फले = फलमें
सक्तः = आसक्त हुआ
कामकारेण = कामनाके द्वारा
निबध्यते = बंधता है

इसलिये निष्कामकर्मयोग उत्तम है।

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥

सर्वकर्माणि, मनसा, संन्यस्य, आस्ते, सुखम्, वशी,
नवद्वारे, पुरे, देही, न, एव, कुर्वन्, न, कारयन्॥ १३॥

और हे अर्जुन—

वशी = वशमें है अन्तःकरण जिसके ऐसा सांख्ययोगका आचरण करनेवाला
देही = पुरुष (तो)
एव = निःसन्देह
न = न
कुर्वन् = करता हुआ
(और)
न = न
कारयन् = करवाता हुआ
नवद्वारे = नवद्वारोंवाले
पुरे = शरीररूप घरमें
सर्वकर्माणि = सब कर्मोंको

मनसा	= मनसे	सुखम्	= आनन्दपूर्वक (सच्चिदानन्दघन परमात्माके स्वरूपमें)
संन्यस्य	= त्यागकर अर्थात् इन्द्रियां इन्द्रियोंके अर्थोंमें बर्तती हैं ऐसा मानता हुआ	आस्ते	= स्थित रहता है

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥

न, कर्तृत्वम्, न, कर्माणि, लोकस्य, सृजति, प्रभुः,
न, कर्मफलसंयोगम्, स्वभावः, तु, प्रवर्तते ॥ १४ ॥

और—

प्रभुः	= परमेश्वर (भी)		(वास्तवमें)
लोकस्य	= भूतप्राणियोंके	सृजति	= रचता है
न	= न	तु	= किन्तु (परमात्माके सकाशसे)
कर्तृत्वम्	= कर्तापनको (और)		
न	= न	स्वभावः	= प्रकृति (ही)
कर्माणि	= कर्मोंको (तथा)	प्रवर्तते	= बर्तती है अर्थात् गुण ही गुणोंमें बर्त रहे हैं
न	= न		
कर्मफल-संयोगम्	= कर्मोंके फलके संयोगको		

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥

न, आदत्ते, कस्यचित्, पापम्, न, च, एव, सुकृतम्, विभुः,
अज्ञानेन, आवृतम्, ज्ञानम्, तेन, मुह्यन्ति, जन्तवः ॥ १५ ॥

और—

विभुः	= सर्वव्यापी परमात्मा	एव	= भी
न	= न	आदत्ते	= ग्रहण करता है
कस्यचित्	= किसीके		(किन्तु)
पापम्	= पापकर्मको	अज्ञानेन	= मायाके द्वारा
च	= और	ज्ञानम्	= ज्ञान
न	= न	आवृतम्	= ढका हुआ है
	(किसीके)	तेन	= इससे
सुकृतम्	= शुभकर्मको	जन्तवः	= सब जीव
		मुह्यन्ति	= मोहित हो रहे हैं

सत्त्वम् = सात्त्विक भाव
अस्मि = हूं

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनंजयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः॥

वृष्णीनाम्, वासुदेवः, अस्मि, पाण्डवानाम्, धनंजयः, मुनीनाम्, अपि, अहम्, व्यासः, कवीनाम्, उशना, कविः॥३७॥

और—

वृष्णीनाम् = वृष्णिवंशियोंमें*
वासुदेवः = वासुदेव अर्थात् मैं स्वयं तुम्हारा सखा (और)
पाण्डवानाम् = पाण्डवोंमें
धनंजयः = धनंजय अर्थात् तूं (एवं)
मुनीनाम् = मुनियोंमें
व्यासः = वेदव्यास

* यादवोंके ही अन्तर्गत एक वृष्णिवंश भी था।

	(और)	अपि	=भी
कवीनाम्	=कवियोंमें	अहम्	=मैं
उशना	=शुक्राचार्य		(ही)
कविः	=कवि	अस्मि	=हूं

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥

दण्डः, दमयताम्, अस्मि, नीतिः, अस्मि, जिगीषताम्, मौनम्, च, एव, अस्मि, गुह्यानाम्, ज्ञानम्, ज्ञानवताम्, अहम्॥

च	=और		
दमयताम्	=दमन करनेवालोंका	गुह्यानाम्	=गोपनीयोंमें अर्थात् गुप्त रखनेयोग्य भावोंमें
दण्डः	=दण्ड अर्थात् दमन करनेकी शक्ति·	मौनम्	=मौन
अस्मि	=हूं	अस्मि	=हूं
			(तथा)
जिगीषताम्	=जीतनेकी इच्छावालोंकी	ज्ञानवताम्	=ज्ञानवानोंका
नीतिः	=नीति	ज्ञानम्	=तत्त्वज्ञान
अस्मि	=हूं (और)	अहम्	=मैं
		एव	=ही (हूं)

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥

यत्, च, अपि, सर्वभूतानाम्, बीजम्, तत्, अहम्, अर्जुन,
न, तत्, अस्ति, विना, यत्, स्यात्, मया, भूतम्, चराचरम् ॥ ३९ ॥

च	= और	(यतः)	= क्योंकि (ऐसा)
अर्जुन	= हे अर्जुन	तत्	= वह
यत्	= जो	चराचरम्	= चर और अचर (कोई भी)
सर्वभूतानाम्	= सब भूतोंकी	भूतम्	= भूत
बीजम्	= उत्पत्तिका कारण है	न	= नहीं
तत्	= वह	अस्ति	= है (कि)
अपि	= भी	यत्	= जो
अहम्	= मैं	मया	= मेरेसे
(एव)	= ही (हूं)	विना	= रहित
		स्यात्	= होवे

इसलिये सब कुछ मेरा ही स्वरूप है ।

नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥

न, अन्तः, अस्ति, मम, दिव्यानाम्, विभूतीनाम्, परंतप,
एषः, तु, उद्देशतः, प्रोक्तः, विभूतेः, विस्तरः, मया ॥ ४० ॥

परंतप	= हे परंतप	दिव्यानाम्	= दिव्य
मम	= मेरी	विभूतीनाम्	= विभूतियोंका

अन्तः	= अन्त	विभूतेः	= विभूतियोंका
न	= नहीं	विस्तरः	= विस्तार
अस्ति	= है		(तेरे लिये)
एषः	= यह	उद्देशतः	= एकदेशसे अर्थात् संक्षेपसे
तु	= तो	प्रोक्तः	= कहा है
मया	= मैंने (अपनी)		

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् ॥

यत्, यत्, विभूतिमत्, सत्त्वम्, श्रीमत्, ऊर्जितम्, एव, वा, तत्, तत्, एव, अवगच्छ, त्वम्, मम, तेजोंऽशसंभवम् ॥ ४१ ॥

इसलिये हे अर्जुन—

यत्	= जो	सत्त्वम्	= वस्तु है
यत्	= जो	तत्	= उस
एव	= भी	तत्	= उसको
विभूतिमत्	= विभूतियुक्त अर्थात् ऐश्वर्ययुक्त (एवं)	त्वम्	= तूं
		मम	= मेरे
श्रीमत्	= कान्तियुक्त	तेजोंऽशसंभवम् एव	= तेजके अंशसे ही उत्पन्न हुई
वा	= और		
ऊर्जितम्	= शक्तियुक्त	अवगच्छ	= जान

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

अथवा, बहुना, एतेन, किम्, ज्ञातेन, तव, अर्जुन,
विष्टभ्य,अहम्,इदम्,कृत्स्नम्,एकांशेन,स्थितः, जगत् ॥४२॥

अथवा	= अथवा	इदम्	= इस
अर्जुन	= हे अर्जुन	कृत्स्नम्	= संपूर्ण
एतेन	= इस	जगत्	= जगत्को
बहुना	= बहुत		(अपनी
ज्ञातेन	= जाननेसे		योगमायाके)
तव	= तेरा	एकांशेन	= एक अंशमात्रसे
किम्	= क्या प्रयोजन है	विष्टभ्य	= धारण करके
अहम्	= मैं	स्थितः	= स्थित हूं

इसलिये मेरेको ही तत्त्वसे जानना चाहिये ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-
संवादे विभूतियोगो नाम
दशमोऽध्यायः ॥ १० ॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा
योगशास्त्रविषयक श्रीकृष्ण और अर्जुनके
संवादमें "विभूतियोग" नामक
दसवां अध्याय ॥ १० ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

ॐ

श्रीपरमात्मने नमः

अथैकादशोऽध्यायः

अर्जुन उवाच

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥

मदनुग्रहाय, परमम्, गुह्यम्, अध्यात्मसंज्ञितम्,
यत्,त्वया,उक्तम्,वचः,तेन,मोहः,अयम्, विगतः,मम ॥१॥

इस प्रकार भगवान्‌के वचन सुनकर अर्जुन बोला, हे भगवन्—

मदनुग्रहाय	= मेरेपर अनुग्रह करनेके लिये	त्वया	= आपके द्वारा
		यत्	= जो
परमम्	= परम	उक्तम्	= कहा गया
गुह्यम्	= गोपनीय	तेन	= उससे
अध्यात्म-संज्ञितम्	= अध्यात्म-विषयक	मम	= मेरा
		अयम्	= यह
वचः	= वचन अर्थात् उपदेश	मोहः	= अज्ञान
		विगतः	= नष्ट हो गया है

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥

भवाप्ययौ, हि, भूतानाम्, श्रुतौ, विस्तरशः, मया, त्वत्तः, कमलपत्राक्ष, माहात्म्यम्, अपि, च, अव्ययम् ॥२॥

हि = क्योंकि
कमलपत्राक्ष = हे कमलनेत्र
मया = मैंने
भूतानाम = भूतोंकी
भवाप्ययौ = उत्पत्ति और प्रलय
त्वत्तः = आपसे
विस्तरशः = विस्तारपूर्वक
श्रुतौ = सुने हैं
च = तथा (आपका)
अव्ययम् = अविनाशी
माहात्म्यम् = प्रभाव
अपि = भी (सुना है)

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥३॥

एवम्, एतत्, यथा, आत्थ, त्वम्, आत्मानम्, परमेश्वर, द्रष्टुम्, इच्छामि, ते, रूपम्, ऐश्वरम्, पुरुषोत्तम ॥ ३ ॥

परमेश्वर = हे परमेश्वर
त्वम् = आप
आत्मानम् = अपनेको
यथा = जैसा
आत्थ = कहते हो
एतत् = यह (ठीक)
एवम् = ऐसा
(एव) = ही है (परंतु)
पुरुषोत्तम = हे पुरुषोत्तम
ते = आपके
ऐश्वरम् = ज्ञान ऐश्वर्य शक्ति बल वीर्य और तेजयुक्त
रूपम् = रूपको (प्रत्यक्ष)
द्रष्टुम् = देखना
इच्छामि = चाहता हूं

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥

मन्यसे, यदि, तत्, शक्यम्, मया, द्रष्टुम्, इति, प्रभो, योगेश्वर, ततः, मे, त्वम्, दर्शय, आत्मानम्, अव्ययम् ॥ ४ ॥

इसलिये—

प्रभो	= हे प्रभो*	मन्यसे	= मानते हैं
मया	= मेरेद्वारा	ततः	= तो
तत्	= वह (आपका रूप)	योगेश्वर	= हे योगेश्वर
द्रष्टुम्	= देखा जाना	त्वम्	= आप (अपने)
शक्यम्	= शक्य है	अव्ययम्	= अविनाशी
इति	= ऐसा	आत्मानम्	= स्वरूपका
यदि	= यदि	मे	= मुझे
		दर्शय	= दर्शन कराइये

श्रीभगवानुवाच

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥

पश्य, मे, पार्थ, रूपाणि, शतशः, अथ, सहस्रशः, नानाविधानि, दिव्यानि, नानावर्णाकृतीनि, च ॥ ५ ॥

इस प्रकार अर्जुनके प्रार्थना करनेपर श्रीकृष्ण भगवान् बोले—

---

* उत्पत्ति, स्थिति और प्रलय तथा अन्तर्यामीरूपसे शासन करनेवाला होनेसे भगवान्‌का नाम प्रभु है।

पार्थ	= हे पार्थ	च	= और
मे	= मेरे	नानावर्णा-कृतीनि	= नानावर्ण तथा आकृतिवाले
शतशः	= सैकड़ों	दिव्यानि	= अलौकिक
अथ	= तथा	रूपाणि	= रूपोंको
सहस्रशः	= हजारों	पश्य	= देख
नानाविधानि	= नाना प्रकारके		

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥

पश्य, आदित्यान्, वसून्, रुद्रान्, अश्विनौ, मरुतः, तथा, बहूनि, अदृष्टपूर्वाणि, पश्य, आश्चर्याणि, भारत ॥ ६ ॥

और—

भारत	= हे भरतवंशी अर्जुन (मेरेमें)		(और)
आदित्यान्	= आदित्योंको अर्थात् अदितिके द्वादश पुत्रोंको	मरुतः	= उन्चास मरुद्गणोंको
	(और)	पश्य	= देख
वसून्	= आठ वसुओंको	तथा	= तथा (और भी)
रुद्रान्	= एकादश रुद्रोंको (तथा)	बहूनि	= बहुत-से
अश्विनौ	= दोनों अश्विनी-कुमारोंको	अदृष्ट-पूर्वाणि	= पहिले न देखे हुए
		आश्चर्याणि	= आश्चर्यमय रूपोंको
		पश्य	= देख

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि॥

इह, एकस्थम्, जगत्, कृत्स्नम्, पश्य, अद्य, सचराचरम्,
मम, देहे, गुडाकेश, यत्, च, अन्यत्, द्रष्टुम्, इच्छसि॥७॥

और—

गुडाकेश	= हे अर्जुन*	कृत्स्नम्	= संपूर्ण
अद्य	= अब	जगत्	= जगत्को
इह	= इस	पश्य	= देख (तथा)
मम	= मेरे	अन्यत्	= और
देहे	= शरीरमें	च	= भी
एकस्थम्	= एक जगह स्थित हुए	यत्	= जो (कुछ)
		द्रष्टुम्	= देखना
सचराचरम्	= चराचर-सहित	इच्छसि	= चाहता है (सो देख)

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥

न, तु, माम्, शक्यसे, द्रष्टुम्, अनेन, एव, स्वचक्षुषा,
दिव्यम्, ददामि, ते, चक्षुः, पश्य, मे, योगम्, ऐश्वरम्॥८॥

तु	= परंतु	माम्	= मेरेको

* निद्राको जीतनेवाला होनेसे अर्जुनका नाम गुडाकेश हुआ था।

अनेन = इन
स्वचक्षुषा = अपने प्राकृत नेत्रोंद्वारा
द्रष्टुम् = देखनेको
एव = निःसन्देह
न शक्यसे = समर्थ नहीं है
(अतः) = इसीसे (मैं)
ते = तेरे लिये
दिव्यम् = दिव्य अर्थात् अलौकिक
चक्षुः = चक्षु
ददामि = देता हूं
(तेन) = उससे (तूं)
मे = मेरे
ऐश्वरम् = प्रभावको (और)
योगम् = योगशक्तिको
पश्य = देख

संजय उवाच

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्॥

एवम्, उक्त्वा, ततः, राजन्, महायोगेश्वरः, हरिः, दर्शयामास, पार्थाय, परमम्, रूपम्, ऐश्वरम् ॥ ९ ॥

संजय बोला—

राजन् = हे राजन्
महा-योगेश्वरः = महायोगेश्वर
(और)
हरिः = सब पापोंके नाश करनेवाले भगवान्ने
एवम् = इस प्रकार
उक्त्वा = कहकर
ततः = उसके उपरान्त
पार्थाय = अर्जुनके लिये
परमम् = परम
ऐश्वरम् = ऐश्वर्ययुक्त
रूपम् = दिव्य स्वरूप
दर्शयामास = दिखाया

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥

अनेकवक्त्रनयनम्, अनेकाद्भुतदर्शनम्,
अनेकदिव्याभरणम्, दिव्यानेकोद्यतायुधम् ॥ १० ॥

और उस—

अनेकवक्त्रनयनम् = अनेक मुख और नेत्रोंसे युक्त (तथा)
अनेकाद्भुतदर्शनम् = अनेक अद्भुत दर्शनोंवाले (एवं)
अनेकदिव्याभरणम् = बहुतसे दिव्य भूषणोंसे युक्त (और)
दिव्यानेकोद्यतायुधम् = बहुतसे दिव्य शस्त्रोंको हाथोंमें उठाये हुए

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥

दिव्यमाल्याम्बरधरम्, दिव्यगन्धानुलेपनम्,
सर्वाश्चर्यमयम्, देवम्, अनन्तम्, विश्वतोमुखम् ॥ ११ ॥

तथा—

दिव्यमाल्याम्बरधरम् = दिव्यमाला और वस्त्रोंको धारण किये हुए (और)
दिव्यगन्धानुलेपनम् = दिव्य गन्धका अनुलेपन किये हुए

(एवं)

सर्वाश्चर्यमयम् = सब प्रकारके आश्चर्योंसे युक्त

अनन्तम् = सीमारहित

विश्वतोमुखम् = विराट् स्वरूप

देवम् = परमदेव परमेश्वरको

(अपश्यत्) = अर्जुनने देखा

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः

दिवि, सूर्यसहस्रस्य, भवेत्, युगपत्, उत्थिता,
यदि, भाः, सदृशी, सा, स्यात्, भासः, तस्य, महात्मनः ॥ १२ ॥

और हे राजन्—

दिवि = आकाशमें

सूर्यसहस्रस्य = हजार सूर्योंके

युगपत् = एक साथ

उत्थिता = उदय होनेसे उत्पन्न हुआ (जो)

भाः = प्रकाश

भवेत् = होवे

सा = वह (भी)

तस्य = उस

महात्मनः = विश्वरूप परमात्माके

भासः = प्रकाशके

सदृशी = सदृश

यदि = कदाचित् ही

स्यात् = होवे

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥

तत्र, एकस्थम्, जगत्, कृत्स्नम्, प्रविभक्तम्, अनेकधा,
अपश्यत्, देवदेवस्य, शरीरे, पाण्डवः, तदा ॥ १३ ॥

ऐसे आश्चर्यमय रूपको देखते हुए—

पाण्डवः = पाण्डुपुत्र अर्जुनने
तदा = उस कालमें
अनेकधा = अनेक प्रकारसे
प्रविभक्तम् = विभक्त हुए अर्थात् पृथक् पृथक् हुए
कृत्स्नम् = संपूर्ण
जगत् = जगत्को
तत्र = उस
देवदेवस्य = देवोंके देव श्रीकृष्ण भगवान्के
शरीरे = शरीरमें
एकस्थम् = एक जगह स्थित
अपश्यत् = देखा

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥

ततः, सः, विस्मयाविष्टः, हृष्टरोमा, धनंजयः,
प्रणम्य, शिरसा, देवम्, कृताञ्जलिः, अभाषत ॥ १४ ॥

और—

ततः = उसके अनन्तर
सः = वह
विस्मयाविष्टः = आश्चर्यसे युक्त हुआ
हृष्टरोमा = हर्षित रोमोंवाला
धनंजयः = अर्जुन
देवम् = विश्वरूप परमात्माको (श्रद्धा भक्ति-सहित)
शिरसा = सिरसे
प्रणम्य = प्रणाम करके
कृताञ्जलिः = हाथ जोड़े हुए
अभाषत = बोला

अर्जुन उवाच—

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ॥१५॥

पश्यामि, देवान्, तव, देव, देहे, सर्वान्, तथा, भूतविशेषसङ्घान्, ब्रह्माणम्, ईशम्, कमलासनस्थम्, ऋषीन्, च, सर्वान्, उरगान्, च, दिव्यान् ॥१५॥

देव	= हे देव
तव	= आपके
देहे	= शरीरमें
सर्वान्	= संपूर्ण
देवान्	= देवोंको
तथा	= तथा
भूतविशेष-सङ्घान्	= अनेक भूतोंके समुदायोंको
	(और)
कमलासनस्थम्	= कमलके आसनपर बैठे हुए
ब्रह्माणम्	= ब्रह्माको
	(तथा)
ईशम्	= महादेवको
च	= और
सर्वान्	= संपूर्ण
ऋषीन्	= ऋषियोंको
च	= तथा
दिव्यान्	= दिव्य
उरगान्	= सर्पोंको
पश्यामि	= देखता हूं

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनन्तरूप ।

नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ॥१६॥

अनेकबाहूदरवक्त्रनेत्रम्, पश्यामि, त्वाम्, सर्वतः,
अनन्तरूपम्, न, अन्तम्, न, मध्यम्, न, पुनः, तव,
आदिम्, पश्यामि, विश्वेश्वर, विश्वरूप ॥ १६ ॥

और—

विश्वेश्वर	= हे संपूर्ण विश्वके स्वामिन्	विश्वरूप	= हे विश्वरूप
त्वाम्	= आपको	तव	= आपके
अनेक-बाहूदर-वक्त्रनेत्रम्	= अनेक हाथ पेट मुख और नेत्रोंसे युक्त (तथा)	न	= न
		अन्तम्	= अन्तको (देखता हूं) (तथा)
सर्वतः	= सब ओरसे	न	= न
अनन्त-रूपम्	= अनन्त रूपोंवाले	मध्यम्	= मध्यको
पश्यामि	= देखता हूं	पुनः	= और
		न	= न
		आदिम्	= आदिको (ही)
		पश्यामि	= देखता हूं

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ता-
द्दीप्तानलार्कद्युतिमप्रमेयम् ॥१७॥

किरीटिनम्, गदिनम्, चक्रिणम्, च, तेजोराशिम्, सर्वतः, दीप्तिमन्तम्, पश्यामि, त्वाम्, दुर्निरीक्ष्यम्, समन्तात्, दीप्तानलार्कद्युतिम्, अप्रमेयम् ॥ १७ ॥

और हे विष्णो—

त्वाम् = आपको (मैं)
किरीटिनम् = मुकुटयुक्त
गदिनम् = गदायुक्त
च = और
चक्रिणम् = चक्रयुक्त
(तथा)
सर्वतः = सब ओरसे
दीप्तिमन्तम् = प्रकाशमान
तेजोराशिम् = तेजका पुञ्ज
दीप्तानलार्कद्युतिम् = प्रज्वलित अग्नि और सूर्यके सदृश ज्योतियुक्त
दुर्निरीक्ष्यम् = देखनेमें अति गहन
(और)
अप्रमेयम् = अप्रमेय-स्वरूप
समन्तात् = सब ओरसे
पश्यामि = देखता हूं

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥१८॥

त्वम्, अक्षरम्, परमम्, वेदितव्यम्, त्वम्, अस्य, विश्वस्य, परम्, निधानम्, त्वम्, अव्ययः, शाश्वतधर्मगोप्ता, सनातनः, त्वम्, पुरुषः, मतः, मे ॥ १८ ॥

इसलिये हे भगवन्—

त्वम्	= आप (ही)	निधानम्	= आश्रय हैं (तथा)
वेदितव्यम्	= जानने योग्य	त्वम्	= आप (ही)
परमम्	= परम	शाश्वत-धर्मगोप्ता	= अनादि धर्मके रक्षक हैं (और)
अक्षरम्	= अक्षर हैं अर्थात् परब्रह्म परमात्मा हैं (और)	त्वम्	= आप (ही)
		अव्ययः	= अविनाशी
त्वम्	= आप (ही)	सनातनः	= सनातन
अस्य	= इस	पुरुषः	= पुरुष हैं (ऐसा)
विश्वस्य	= जगत्के	मे	= मेरा
परम्	= परम	मतः	= मत है

अनादिमध्यान्तमनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥१९॥

अनादिमध्यान्तम्, अनन्तवीर्यम्, अनन्तबाहुम्, शशिसूर्यनेत्रम्, पश्यामि, त्वाम्, दीप्तहुताशवक्त्रम्, स्वतेजसा, विश्वम्, इदम्, तपन्तम् ॥ १९ ॥

हे परमेश्वर ! मैं—

त्वाम्	= आपको	अनादि-मध्यान्तम्	= आदि अन्त और मध्यसे रहित (तथा)

अनन्तवीर्यम् = अनन्त सामर्थ्यसे युक्त (और)
अनन्तबाहुम् = अनन्त हाथोंवाला (तथा)
शशिसूर्यनेत्रम् = चन्द्र सूर्यरूप नेत्रोंवाला (और)
दीप्तहुताशवक्त्रम् = प्रज्वलित अग्निरूप मुखवाला (तथा)
स्वतेजसा = अपने तेजसे
इदम् = इस
विश्वम् = जगत्को
तपन्तम् = तपायमान करता हुआ
पश्यामि = देखता हूं

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महात्मन् ॥२०॥

द्यावापृथिव्योः, इदम्, अन्तरम्, हि, व्याप्तम्, त्वया, एकेन, दिशः, च, सर्वाः, दृष्ट्वा, अद्भुतम्, रूपम्, उग्रम्, तव, इदम्, लोकत्रयम्, प्रव्यथितम्, महात्मन् ॥ २० ॥

और—

महात्मन् = हे महात्मन्
इदम् = यह
द्यावापृथिव्योः = स्वर्ग और पृथिवीके
अन्तरम् = बीचका संपूर्ण आकाश
च = तथा
सर्वाः = सब

दिशः	= दिशाएं		(और)
एकेन	= एक	उग्रम्	= भयंकर
त्वया	= आपसे	रूपम्	= रूपको
हि	= ही	दृष्ट्वा	= देखकर
व्याप्तम्	= परिपूर्ण हैं (तथा)	लोकत्रयम्	= तीनों लोक
तव	= आपके	प्रव्यथितम्	= अति व्यथाको प्राप्त हो रहे हैं
इदम्	= इस		
अद्भुतम्	= अलौकिक		

अमी हि त्वां सुरसंघा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥२१॥

अमी, हि, त्वाम्, सुरसंघाः, विशन्ति, केचित्, भीताः, प्राञ्जलयः, गृणन्ति, स्वस्ति, इति, उक्त्वा, महर्षिसिद्धसंघाः, स्तुवन्ति, त्वाम्, स्तुतिभिः, पुष्कलाभिः ॥ २१ ॥

और हे गोविन्द—

अमी	= वे (सब)	विशन्ति	= प्रवेश करते हैं
सुरसंघाः	= देवताओंके समूह		(और)
		केचित्	= कई एक
त्वाम्	= आपमें	भीताः	= भयभीत होकर
हि	= ही	प्राञ्जलयः	= हाथ जोड़े हुए

	(आपके नाम और गुणोंका)	इति	= ऐसा
गृणन्ति	= उच्चारण करते हैं (तथा)	उक्त्वा	= कहकर
महर्षि-सिद्धसंघाः	= महर्षि और सिद्धोंके समुदाय	पुष्कलाभिः	= उत्तम उत्तम
		स्तुतिभिः	= स्तोत्रोंद्वारा
स्वस्ति	= कल्याण होवे	त्वाम्	= आपकी
		स्तुवन्ति	= स्तुति करते हैं

रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसंघा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥२२॥

रुद्रादित्याः, वसवः, ये, च, साध्याः, विश्वे, अश्विनौ, मरुतः, च, ऊष्मपाः, च, गन्धर्वयक्षासुरसिद्धसंघाः, वीक्षन्ते, त्वाम्, विस्मिताः, च, एव, सर्वे ॥ २२ ॥

और हे परमेश्वर—

ये	= जो	साध्याः	= साध्यगण
रुद्रादित्याः	= एकादश रुद्र और द्वादश आदित्य	विश्वे	= विश्वेदेव (तथा)
		अश्विनौ	= अश्विनीकुमार
च	= तथा	च	= और
वसवः	= आठ वसु (और)	मरुतः	= मरुद्गण
		च	= और

ऊष्मपाः = पितरोंका समुदाय
च = तथा
गन्धर्व-यक्षासुर-सिद्धसंघाः = गन्धर्व यक्ष राक्षस और सिद्धगणोंके समुदाय हैं
(ते) = वे
सर्वे = सब
एव = ही
विस्मिताः = विस्मित हुए
त्वाम् = आपको
वीक्षन्ते = देखते हैं

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्॥ २३॥

रूपम्, महत्, ते, बहुवक्त्रनेत्रम्, महाबाहो, बहुबाहूरुपादम्, बहूदरम्, बहुदंष्ट्राकरालम्, दृष्ट्वा, लोकाः, प्रव्यथिताः, तथा, अहम् ॥ २३ ॥

और—

महाबाहो = हे महाबाहो
ते = आपके
बहुवक्त्र-नेत्रम् = बहुत मुख और नेत्रोंवाले (तथा)
बहुबाहू-रुपादम् = बहुत हाथ जंघा और पैरोंवाले (और)
बहूदरम् = बहुत उदरोंवाले (तथा)

बहुदंष्ट्राकरालम् = बहुतसी विकराल जाड़ोंवाले
महत् = महान्
रूपम् = रूपको
दृष्ट्वा = देखकर
लोकाः = सब लोक
प्रव्यथिताः = व्याकुल हो रहे हैं
तथा = तथा
अहम् = मैं
(अपि) = भी
(व्याकुल हो रहा हूं)

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो॥ २४॥

नभःस्पृशम्, दीप्तम्, अनेकवर्णम्, व्यात्ताननम्, दीप्तविशालनेत्रम्, दृष्ट्वा, हि, त्वाम्, प्रव्यथितान्तरात्मा, धृतिम्, न, विन्दामि, शमम्, च, विष्णो ॥ २४ ॥

हि = क्योंकि
विष्णो = हे विष्णो
नभःस्पृशम् = आकाशके साथ स्पर्श किये हुए
दीप्तम् = देदीप्यमान
अनेकवर्णम् = अनेक रूपोंसे युक्त
(तथा)
व्यात्ताननम् = फैलाये हुए मुख (और)
दीप्तविशालनेत्रम् = प्रकाशमान विशाल नेत्रोंसे युक्त
त्वाम् = आपको
दृष्ट्वा = देखकर

प्रव्यथितान्तरात्मा	= भयभीत अन्तःकरणवाला (मैं)	च	= और
		शमम्	= शान्तिको
		न	= नहीं
धृतिम्	= धीरज	विन्दामि	= प्राप्त होता हूं

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥२५॥

दंष्ट्राकरालानि, च, ते, मुखानि, दृष्ट्वा, एव, कालानलसन्निभानि, दिशः, न, जाने, न, लभे, च, शर्म, प्रसीद, देवेश, जगन्निवास ॥ २५ ॥

और हे भगवन्—

ते	= आपके	जाने	= जानता हूं
दंष्ट्राकरालानि	= विकराल जाड़ोंवाले	च	= और
		शर्म	= सुखको
च	= और	एव	= भी
कालानलसन्निभानि	= प्रलयकालकी अग्निके समान प्रज्वलित	न	= नहीं
		लभे	= प्राप्त होता हूं
		(अतः)	= इसलिये
मुखानि	= मुखोंको	देवेश	= हे देवेश
दृष्ट्वा	= देखकर	जगन्निवास	= हे जगन्निवास (आप)
दिशः	= दिशाओंको		
न	= नहीं	प्रसीद	= प्रसन्न होवें

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः ॥२६॥

अमी, च, त्वाम्, धृतराष्ट्रस्य, पुत्राः, सर्वे, सह, एव, अवनिपालसंघैः, भीष्मः, द्रोणः, सूतपुत्रः, तथा, असौ, सह, अस्मदीयैः, अपि, योधमुख्यैः ॥ २६ ॥

और मैं देखता हूं कि—

अमी	= वे	भीष्मः	= भीष्मपितामह
सर्वे	= सब	द्रोणः	= द्रोणाचार्य
एव	= ही	तथा	= तथा
धृतराष्ट्रस्य	= धृतराष्ट्रके	असौ	= वह
पुत्राः	= पुत्र	सूतपुत्रः	= कर्ण (और)
अवनि-पालसंघैः	= राजाओंके समुदाय	अस्मदीयैः	= हमारे पक्षके
सह	= सहित	अपि	= भी
त्वाम्	= आपमें	योधमुख्यैः	= प्रधान योधाओंके
(विशन्ति)	= प्रवेश करते हैं	सह	= सहित (सब-के-सब)
च	= और		

वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।

केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥२७॥

वक्त्राणि, ते, त्वरमाणाः, विशन्ति, दंष्ट्राकरालानि, भयानकानि, केचित्, विलग्नाः, दशनान्तरेषु, संदृश्यन्ते, चूर्णितैः, उत्तमाङ्गैः ॥ २७ ॥

त्वरमाणाः = वेगयुक्त हुए
ते = आपके
दंष्ट्राकरालानि = { विकराल / जाड़ोंवाले
भयानकानि = भयानक
वक्त्राणि = मुखोंमें
विशन्ति = प्रवेश करते हैं (और)

केचित् = कई एक
चूर्णितैः = चूर्ण हुए
उत्तमाङ्गैः = सिरोंसहित (आपके)
दशनान्तरेषु = { दांतोंके / बीचमें
विलग्नाः = लगे हुए
संदृश्यन्ते = दीखते हैं

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति॥२८॥

यथा, नदीनाम्, बहवः, अम्बुवेगाः, समुद्रम्, एव, अभिमुखाः, द्रवन्ति, तथा, तव, अमी, नरलोकवीराः, विशन्ति, वक्त्राणि, अभिविज्वलन्ति ॥ २८ ॥

और हे विश्वमूर्ते—

यथा	= जैसे	तथा	= वैसे ही
नदीनाम्	= नदियोंके	अमी	= वे
बहवः	= बहुतसे	नरलोक-वीराः	= शूरवीर मनुष्योंके समुदाय (भी)
अम्बुवेगाः	= जलके प्रवाह	तव	= आपके
समुद्रम	= समुद्रके	अभि-विज्वलन्ति	= प्रज्वलित हुए
एव	= ही	वक्त्राणि	= मुखोंमें
अभिमुखाः	= सम्मुख	विशन्ति	= प्रवेश करते हैं
द्रवन्ति	= दौड़ते हैं अर्थात् समुद्रमें प्रवेश करते हैं		

यथा प्रदीप्तं ज्वलनं पतङ्गा
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥

यथा, प्रदीप्तम्, ज्वलनम्, पतङ्गाः, विशन्ति, नाशाय, समृद्धवेगाः, तथा, एव, नाशाय, विशन्ति, लोकाः, तव, अपि, वक्त्राणि, समृद्धवेगाः ॥ २९ ॥

अथवा—

यथा	= जैसे	नाशाय	= नष्ट होनेके लिये
पतङ्गाः	= पतङ्ग (मोहके वश होकर)	प्रदीप्तम्	= प्रज्वलित

ज्वलनम् = अग्निमें
समृद्धवेगाः = अति वेगसे युक्त हुए
विशन्ति = प्रवेश करते हैं
तथा = वैसे
एव = ही
लोकाः = यह सब लोग
अपि = भी

नाशाय = अपने नाशके लिये
तव = आपके
वक्त्राणि = मुखोंमें
समृद्धवेगाः = अति वेगसे युक्त हुए
विशन्ति = प्रवेश करते हैं

लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ॥३०॥

लेलिह्यसे, ग्रसमानः, समन्तात्, लोकान्, समग्रान्, वदनैः, ज्वलद्भिः, तेजोभिः, आपूर्य, जगत्, समग्रम्, भासः, तव, उग्राः, प्रतपन्ति, विष्णो ॥ ३० ॥

और आप उन–

समग्रान् = संपूर्ण
लोकान् = लोकोंको
ज्वलद्भिः = प्रज्वलित
वदनैः = मुखोंद्वारा
ग्रसमानः = ग्रसन करते हुए
समन्तात् = सब ओरसे

लेलिह्यसे = चाट रहे हैं
विष्णो = हे विष्णो
तव = आपका
उग्राः = उग्र
भासः = प्रकाश
समग्रम् = संपूर्ण

जगत्	= जगत्को	प्रतपन्ति	= तपायमान करता है
तेजोभिः	= तेजके द्वारा		
आपूर्य	= परिपूर्ण करके		

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥३१॥

आख्याहि, मे, कः, भवान्, उग्ररूपः, नमः, अस्तु, ते, देववर, प्रसीद, विज्ञातुम्, इच्छामि, भवन्तम्, आद्यम्, न, हि, प्रजानामि, तव, प्रवृत्तिम् ॥ ३१ ॥

हे भगवन् ! कृपा करके—

मे	= मेरे प्रति	आद्यम्	= आदिस्वरूप
आख्याहि	= कहिये (कि)	भवन्तम्	= आपको (मैं)
भवान्	= आप	विज्ञातुम्	= तत्त्वसे जानना
उग्ररूपः	= उग्ररूपवाले	इच्छामि	= चाहता हूं
कः	= कौन हैं	हि	= क्योंकि
देववर	= हे देवोंमें श्रेष्ठ	तव	= आपकी
ते	= आपको	प्रवृत्तिम्	= प्रवृत्तिको (मैं)
नमः	= नमस्कार		
अस्तु	= होवे (आप)	न	= नहीं
प्रसीद	= प्रसन्न होइये	प्रजानामि	= जानता

श्रीभगवानुवाच

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥३२॥

कालः, अस्मि, लोकक्षयकृत्, प्रवृद्धः, लोकान्, समाहर्तुम्, इह, प्रवृत्तः, ऋते, अपि, त्वाम्, न, भविष्यन्ति, सर्वे, ये, अवस्थिताः, प्रत्यनीकेषु, योधाः ॥ ३२ ॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण भगवान् बोले, हे अर्जुन ! मैं—

लोकक्षयकृत् = लोकोंका नाश करनेवाला
प्रवृद्धः = बढ़ा हुआ
कालः = महाकाल
अस्मि = हूं
इह = इस समय (इन)
लोकान् = लोकोंको
समाहर्तुम् = नष्ट करनेके लिये
प्रवृत्तः = प्रवृत्त हुआ हूं (इसलिये)
ये = जो
प्रत्यनीकेषु = प्रतिपक्षियोंकी सेनामें
अवस्थिताः = स्थित हुए
योधाः = योधालोग हैं
(ते) = वे
सर्वे = सब
त्वाम् = तेरे
ऋते = बिना
अपि = भी
न = नहीं
भविष्यन्ति = रहेंगे—

अर्थात् तेरे युद्ध न करनेसे भी इन सबका नाश हो जायगा।

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥३३॥

तस्मात्, त्वम्, उत्तिष्ठ, यशः, लभस्व, जित्वा, शत्रून्, भुङ्क्ष्व, राज्यम्, समृद्धम्, मया, एव, एते, निहताः, पूर्वम्, एव, निमित्तमात्रम्, भव, सव्यसाचिन् ॥ ३३ ॥

तस्मात्	= इससे		(शूरवीर)
त्वम्	= तूं	पूर्वम्	= पहिलेसे
उत्तिष्ठ	= खड़ा हो (और)	एव	= ही
यशः	= यशको	मया	= मेरे द्वारा
लभस्व	= प्राप्त कर (तथा)	निहताः	= मारे हुए हैं
शत्रून्	= शत्रुओंको	सव्य-साचिन्	= हे सव्य-साचिन्*
जित्वा	= जीतकर		(तूं तो)
समृद्धम्	= धनधान्यसे सम्पन्न	निमित्त-मात्रम्	= केवल निमित्तमात्र
राज्यम्	= राज्यको	एव	= ही
भुङ्क्ष्व	= भोग (और)	भव	= हो जा
एते	= यह सब		

* बायें हाथसे भी बाण चलानेका अभ्यास होनेसे अर्जुनका नाम सव्यसाची हुआ था ।

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥३४॥

द्रोणम्, च, भीष्मम्, च, जयद्रथम्, च, कर्णम्, तथा, अन्यान्, अपि, योधवीरान्, मया, हतान्, त्वम्, जहि, मा, व्यथिष्ठाः, युध्यस्व, जेतासि, रणे, सपत्नान् ॥ ३४ ॥

तथा इन—

द्रोणम्	= द्रोणाचार्य	योधवीरान्	= शूरवीर योधाओंको
च	= और		
भीष्मम्	= भीष्मपितामह	त्वम्	= तूं
च	= तथा	जहि	= मार (और)
जयद्रथम्	= जयद्रथ	मा व्यथिष्ठाः	= भय मत कर
च	= और		
कर्णम्	= कर्ण	रणे	= (निःसन्देह (तूं) युद्धमें
तथा	= तथा		
अन्यान् अपि	= और भी बहुतसे	सपत्नान्	= वैरियोंको
		जेतासि	= जीतेगा
मया	= मेरे द्वारा	(अतः)	= इसलिये
हतान्	= मारे हुए	युध्यस्व	= युद्ध कर

संजय उवाच

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी ।

नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥३५॥

एतत्, श्रुत्वा, वचनम्, केशवस्य, कृताञ्जलिः, वेपमानः, किरीटी, नमस्कृत्वा, भूयः, एव, आह, कृष्णम्, सगद्गदम्, भीतभीतः, प्रणम्य ॥ ३५ ॥

इसके उपरान्त संजय बोला कि हे राजन्—

केशवस्य	= केशव भगवान्के	भूयः	= फिर
एतत्	= इस	एव	= भी
वचनम्	= वचनको	भीतभीतः	= भयभीत हुआ
श्रुत्वा	= सुनकर	प्रणम्य	= प्रणाम करके
किरीटी	= मुकुटधारी अर्जुन	कृष्णम्	= भगवान् श्रीकृष्णके प्रति
कृताञ्जलिः	= हाथ जोड़े हुए	सगद्गदम्	= गद्गद वाणीसे
वेपमानः	= कांपता हुआ	आह	= बोला
नमस्कृत्वा	= नमस्कार करके		

अर्जुन उवाच

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसंघाः ॥३६॥

स्थाने, हृषीकेश, तव, प्रकीर्त्या, जगत्, प्रहृष्यति, अनुरज्यते, च, रक्षांसि, भीतानि, दिशः, द्रवन्ति, सर्वे, नमस्यन्ति, च, सिद्धसंघाः ॥ ३६ ॥

कि—

हृषीकेश	= हे अन्तर्यामिन्	अनुरज्यते	= अनुरागको भी प्राप्त होता है (तथा)
स्थाने	= यह योग्य ही है (कि)	भीतानि	= भयभीत हुए
(यत्)	= जो	रक्षांसि	= राक्षसलोग
तव	= आपके	दिशः	= दिशाओंमें
प्रकीर्त्या	= नाम और प्रभावके कीर्तनसे	द्रवन्ति	= भागते हैं
जगत्	= जगत्	च	= और
प्रहृष्यति	= अति हर्षित होता है	सर्वे	= सब
च	= और	सिद्धसंघाः	= सिद्धगणोंके समुदाय
		नमस्यन्ति	= नमस्कार करते हैं

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥३७॥

कस्मात्, च, ते, न, नमेरन्, महात्मन्, गरीयसे, ब्रह्मणः, अपि, आदिकर्त्रे, अनन्त, देवेश, जगन्निवास, त्वम्, अक्षरम्, सत्, असत्, तत्परम्, यत् ॥ ३७ ॥

महात्मन्	= हे महात्मन्	देवेश	= हे देवेश
ब्रह्मणः	= ब्रह्माके	जगन्निवास	= हे जगन्निवास
अपि	= भी	यत्	= जो
आदिकर्त्रे	= आदिकर्ता	सत्	= सत्
च	= और	असत्	= असत् (और)
गरीयसे	= सबसे बड़े	तत्परम्	= उनसे परे
ते	= आपके लिये (वे)	अक्षरम्	= अक्षर अर्थात् सच्चिदानन्द-घन ब्रह्म है
कस्मात्	= कैसे	(तत्)	= वह
न नमेरन्	= नमस्कार नहीं करें	त्वम्	= आप ही हैं
	(क्योंकि)		
अनन्त	= हे अनन्त		

त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥३८॥

त्वम्, आदिदेवः, पुरुषः, पुराणः, त्वम्, अस्य, विश्वस्य, परम्, निधानम्, वेत्ता, असि, वेद्यम्, च, परम्, च, धाम, त्वया, ततम्, विश्वम्, अनन्तरूप ॥ ३८ ॥

और हे प्रभो—

त्वम्	= आप		(तथा)
आदिदेवः	= आदिदेव	वेद्यम्	= जाननेयोग्य
	(और)	च	= और
पुराणः	= सनातन	परम्	= परम
पुरुषः	= पुरुष हैं	धाम	= धाम
त्वम्	= आप	असि	= हैं
अस्य	= इस	अनन्तरूप	= हे अनन्तरूप
विश्वस्य	= जगत्के	त्वया	= आपसे
परम्	= परम		(यह सब)
निधानम्	= आश्रय	विश्वम्	= जगत्
च	= और	ततम्	= व्याप्त अर्थात् परिपूर्ण है
वेत्ता	= जाननेवाले		

वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥३९॥

वायुः, यमः, अग्निः, वरुणः, शशाङ्कः, प्रजापतिः, त्वम्, प्रपितामहः, च, नमः, नमः, ते, अस्तु, सहस्रकृत्वः, पुनः, च, भूयः, अपि, नमः, नमः, ते ॥ ३९ ॥

और हे हरे—

त्वम्	= आप	यमः	= यमराज
वायुः	= वायु	अग्निः	= अग्नि

वरुणः	= वरुण	नमः	= नमस्कार
शशाङ्कः	= चन्द्रमा (तथा)	नमः	= नमस्कार
प्रजापतिः	= प्रजाके स्वामी ब्रह्मा	अस्तु	= होवे
च	= और	ते	= आपके लिये
प्रपितामहः	= ब्रह्माके भी पिता	भूयः	= फिर
(असि)	= हैं	अपि	= भी
ते	= आपके लिये	पुनः च	= बारम्बार
सहस्रकृत्वः	= हजारों बार	नमः	= नमस्कार
		नमः	= नमस्कार
			(होवे)

नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः ॥४०॥

नमः, पुरस्तात्, अथ, पृष्ठतः, ते, नमः, अस्तु, ते, सर्वतः, एव, सर्व, अनन्तवीर्य, अमितविक्रमः, त्वम्, सर्वम्, समाप्नोषि, ततः, असि, सर्वः ॥ ४० ॥

और—

अनन्तवीर्य	= हे अनन्त सामर्थ्यवाले	पुरस्तात्	= आगेसे
ते	= आपके लिये	अथ	= और
		पृष्ठतः	= पीछेसे भी

नमः	=नमस्कार होवे	त्वम्	=आप
सर्व	=हे सर्वात्मन्	सर्वम्	=सब संसारको
ते	=आपके लिये	समाप्नोषि	=व्याप्त किये हुए हैं
सर्वतः	=सब ओरसे	ततः	=इससे (आप ही)
एव	=ही	सर्वः	=सर्वरूप
नमः	=नमस्कार	असि	=हैं
अस्तु	=होवे (क्योंकि)		
अमित-विक्रमः	=अनन्त पराक्रमशाली		

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि ॥४१॥

सखा, इति, मत्वा, प्रसभम्, यत्, उक्तम्, हे कृष्ण, हे यादव, हे सखे, इति, अजानता, महिमानम्, तव, इदम्, मया, प्रमादात्, प्रणयेन, वा, अपि ॥ ४१ ॥

हे परमेश्वर—

सखा	=सखा	अजानता	=न जानते हुए
इति	=ऐसे	मया	=मेरेद्वारा
मत्वा	=मानकर	प्रणयेन	=प्रेमसे
तव	=आपके	वा	=अथवा
इदम्	=इस	प्रमादात्	=प्रमादसे
महिमानम्	=प्रभावको	अपि	=भी

हे कृष्ण	= हे कृष्ण	यत्	= जो (कुछ)
हे यादव	= हे यादव	प्रसभम्	= हठपूर्वक
हे सखे	= हे सखे	उक्तम्	= कहा गया है
इति	= इस प्रकार		

यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ॥४२॥

यत्, च, अवहासार्थम्, असत्कृतः, असि, विहारशय्यासनभोजनेषु, एकः, अथवा, अपि, अच्युत, तत्समक्षम्, तत्, क्षामये, त्वाम्, अहम्, अप्रमेयम् ॥४२॥

च	= और	एकः	= अकेले
अच्युत	= हे अच्युत	अथवा	= अथवा
यत्	= जो (आप)	तत्समक्षम्	= उन सखाओंके सामने
अवहासार्थम्	= हंसीके लिये	अपि	= भी
विहारशय्या आसन भोजनेषु	= विहार शय्या आसन और भोजनादिकोंमें	असत्कृतः	= अपमानित किये गये
		असि	= हैं
		तत्	= वह (सब अपराध)

अप्रमेयम्= अप्रमेयस्वरूप अर्थात् अचिन्त्य प्रभाववाले | त्वाम् = आपसे
अहम् = मैं
क्षामये = क्षमा कराता हूं

पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥४३॥

पिता, असि, लोकस्य, चराचरस्य, त्वम्, अस्य, पूज्यः, च, गुरुः, गरीयान्, न, त्वत्समः, अस्ति, अभ्यधिकः, कुतः, अन्यः, लोकत्रये, अपि, अप्रतिमप्रभाव ॥ ४३ ॥

हे विश्वेश्वर—

त्वम्	= आप	अप्रतिम-प्रभाव	= हे अतिशय प्रभाववाले
अस्य	= इस	लोकत्रये	= तीनों लोकोंमें
चराचरस्य	= चराचर	त्वत्समः	= आपके समान
लोकस्य	= जगत्के	अपि	= भी
पिता	= पिता	अन्यः	= दूसरा कोई
च	= और	न	= नहीं
गरीयान्	= गुरुसे भी बड़े	अस्ति	= है (फिर)
गुरुः	= गुरु (एवं)	अभ्यधिकः	= अधिक
पूज्यः	= अति पूजनीय	कुतः	= कैसे (होवे)
असि	= हैं		

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥४४॥

तस्मात्, प्रणम्य, प्रणिधाय, कायम्, प्रसादये, त्वाम्, अहम्, ईशम्, ईड्यम्, पिता, इव, पुत्रस्य, सखा, इव, सख्युः, प्रियः, प्रियायाः, अर्हसि, देव, सोढुम् ॥ ४४ ॥

तस्मात्	= इससे (हे प्रभो)	देव	= हे देव
अहम्	= मैं	पिता	= पिता
कायम्	= शरीरको	इव	= जैसे
प्रणिधाय	= अच्छी प्रकार चरणोंमें रखके (और)	पुत्रस्य	= पुत्रके (और)
		सखा	= सखा
		इव	= जैसे
प्रणम्य	= प्रणाम करके	सख्युः	= सखाके (और)
ईड्यम्	= स्तुति करने योग्य	प्रियः	= पति
		(इव)	= जैसे
त्वाम्	= आप	प्रियायाः	= प्रिय स्त्रीके (वैसे ही आप भी)
ईशम्	= ईश्वरको		
प्रसादये	= प्रसन्न होनेके लिये प्रार्थना करता हूं	(मम)	= मेरे
		(अपराधम्)	= अपराधको

सोढुम् = सहन करनेके लिये | अर्हसि = योग्य हैं

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥४५॥

अदृष्टपूर्वम्, हृषितः, अस्मि, दृष्ट्वा, भयेन, च, प्रव्यथितम्, मनः, मे, तत्, एव, मे, दर्शय, देव, रूपम्, प्रसीद, देवेश, जगन्निवास ॥ ४५ ॥

हे विश्वमूर्ते ! मैं—

अदृष्टपूर्वम् = पहिले न देखे हुए आश्चर्यमय आपके इस रूपको
दृष्ट्वा = देखकर
हृषितः = हर्षित हो रहा
अस्मि = हूं (और)
मे = मेरा
मनः = मन
भयेन = भयसे
प्रव्यथितम् च = अति व्याकुल भी हो रहा है

(अतः) = इसलिये
देव = हे देव (आप)
तत् = उस
रूपम् = (अपने चतुर्भुज) रूपको
एव = ही
मे = मेरे लिये
दर्शय = दिखाइये
देवेश = हे देवेश
जगन्निवास = हे जगन्निवास
प्रसीद = प्रसन्न होइये

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥४६॥

किरीटिनम्, गदिनम्, चक्रहस्तम्, इच्छामि, त्वाम्, द्रष्टुम्, अहम्, तथा, एव, तेन, एव, रूपेण, चतुर्भुजेन, सहस्रबाहो, भव, विश्वमूर्ते ॥ ४६ ॥

और हे विष्णो—

अहम्	= मैं	इच्छामि	= चाहता हूं
तथा	= वैसे	(अतः)	= इसलिये
एव	= ही	विश्वमूर्ते	= हे विश्वस्वरूप
त्वाम्	= आपको	सहस्रबाहो	= हे सहस्रबाहो (आप)
किरीटिनम्	= मुकुट धारण किये हुए (तथा)	तेन	= उस
गदिनम् चक्रहस्तम्	= गदा और चक्र हाथमें लिये हुए	एव	= ही
		चतुर्भुजेन	= चतुर्भुज
द्रष्टुम्	= देखना	रूपेण	= रूपसे (युक्त)
		भव	= होइये

श्रीभगवानुवाच

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।

तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥४७॥

मया, प्रसन्नेन, तव, अर्जुन, इदम्, रूपम्, परम्, दर्शितम्, आत्मयोगात्, तेजोमयम्, विश्वम्, अनन्तम्, आद्यम्, यत्, मे, त्वदन्येन, न, दृष्टपूर्वम् ॥ ४७ ॥

इस प्रकार अर्जुनकी प्रार्थनाको सुनकर श्रीकृष्ण भगवान् बोले—

अर्जुन	= हे अर्जुन		(और)
प्रसन्नेन	= अनुग्रहपूर्वक	अनन्तम्	= सीमारहित
मया	= मैंने	विश्वम्	= विराट्
आत्मयोगात्	= अपनी योगशक्तिके प्रभावसे	रूपम्	= रूप
		तव	= तेरेको
		दर्शितम्	= दिखाया है
इदम्	= यह	यत्	= जो (कि)
मे	= मेरा	त्वदन्येन	= तेरे सिवाय दूसरेसे
परम्	= परम	न दृष्टपूर्वम्	= पहिले नहीं देखा गया
तेजोमयम्	= तेजोमय		
आद्यम्	= सबका आदि		

न वेदयज्ञाध्ययनैर्न दानै-
र्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥


न, वेदयज्ञाध्ययनैः, न, दानैः, न, च, क्रियाभिः, न, तपोभिः, उग्रैः, एवंरूपः, शक्यः, अहम्, नृलोके, द्रष्टुम्, त्वदन्येन, कुरुप्रवीर ॥ ४८ ॥

कुरुप्रवीर	= हे अर्जुन	दानैः	= दानसे (और)
नृलोके	= मनुष्यलोकमें	न	= न
एवंरूपः	= इस प्रकार विश्वरूपवाला	क्रियाभिः	= क्रियाओंसे
अहम्	= मैं	च	= और
न	= न	न	= न
वेद-यज्ञाध्ययनैः	= वेद और यज्ञोंके अध्ययनसे (तथा)	उग्रैः	= उग्र
न	= न	तपोभिः	= तपोंसे (ही)
		त्वदन्येन	= तेरे सिवाय दूसरेसे
		द्रष्टुम्	= देखा जानेको
		शक्यः	= शक्य हूं

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥४९॥

मा, ते, व्यथा, मा, च, विमूढभावः, दृष्ट्वा, रूपम्, घोरम्, ईदृक्, मम, इदम्, व्यपेतभीः, प्रीतमनाः, पुनः, त्वम्, तत्, एव, मे, रूपम्, इदम्, प्रपश्य ॥ ४९ ॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥



मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः । निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥

ईदृक्	= इस प्रकारके	व्यपेतभीः	= भयरहित
मम	= मेरे	प्रीतमनाः	= प्रीतियुक्त मनवाला
इदम्	= इस	त्वम्	= तूं
घोरम्	= विकराल	तत्	= उस
रूपम्	= रूपको	एव	= ही
दृष्ट्वा	= देखकर	मे	= मेरे
ते	= तेरेको	इदम्	= इस
व्यथा	= व्याकुलता	रूपम्	= (शङ्ख चक्र गदा पद्मसहित चतुर्भुज) रूपको
मा	= न होवे	पुनः	= फिर
च	= और	प्रपश्य	= देख
विमूढभावः	= मूढभाव (भी)		
मा	= न होवे (और)		

संजय उवाच

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥

इति, अर्जुनम्, वासुदेवः, तथा, उक्त्वा, स्वकम्, रूपम्, दर्शयामास, भूयः, आश्वासयामास, च, भीतम्, एनम्, भूत्वा, पुनः, सौम्यवपुः, महात्मा ॥ ५० ॥

उसके उपरान्त संजय बोला, हे राजन्—

वासुदेवः	= वासुदेव भगवान्ने	च	= और
		पुनः	= फिर
अर्जुनम्	= अर्जुनके प्रति	महात्मा	= महात्मा कृष्णने
इति	= इस प्रकार	सौम्यवपुः	= सौम्यमूर्ति
उक्त्वा	= कहकर	भूत्वा	= होकर
भूयः	= फिर	एनम्	= इस
तथा	= वैसे ही	भीतम्	= भयभीत हुए अर्जुनको
स्वकम्	= अपने	आश्वास-यामास	= धीरज दिया
रूपम्	= चतुर्भुजरूपको		
दर्शयामास	= दिखाया		

अर्जुन उवाच

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥

दृष्ट्वा, इदम्, मानुषम्, रूपम्, तव, सौम्यम्, जनार्दन, इदानीम्, अस्मि, संवृत्तः, सचेताः, प्रकृतिम्, गतः ॥५१॥

उसके उपरान्त अर्जुन बोला—

जनार्दन	= हे जनार्दन	दृष्ट्वा	= देखकर
तव	= आपके	इदानीम्	= अब (मैं)
इदम्	= इस	सचेताः	= शान्तचित्त
सौम्यम्	= अतिशान्त	संवृत्तः	= हुआ
मानुषम्	= मनुष्य	प्रकृतिम्	= अपने स्वभावको
रूपम्	= रूपको		

गतः = प्राप्त हो गया | अस्मि = हूं

श्रीभगवानुवाच

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥

सुदुर्दर्शम्, इदम्, रूपम्, दृष्टवानसि, यत्, मम,
देवाः, अपि, अस्य, रूपस्य, नित्यम्, दर्शनकाङ्क्षिणः ॥ ५२॥

इस प्रकार अर्जुनके वचनको सुनकर श्रीभगवान् बोले, हे अर्जुन—

मम	= मेरा	(यतः)	= क्योंकि
इदम्	= यह	देवाः	= देवता
रूपम्	= (चतुर्भुज) रूप	अपि	= भी
सुदुर्दर्शम्	= देखनेको अति दुर्लभ है	नित्यम्	= सदा
	(कि)	अस्य	= इस
यत्	= जिसको	रूपस्य	= रूपके
	(तुमने)	दर्शन-काङ्क्षिणः	= दर्शन करनेकी इच्छावाले हैं
दृष्टवानसि	= देखा है		

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥

न, अहम्, वेदैः, न, तपसा, न, दानेन, न, च, इज्यया,
शक्यः, एवंविधः, द्रष्टुम्, दृष्टवानसि, माम्, यथा ॥५३॥

और हे अर्जुन—

न	= न	एवंविधः	= इस प्रकार चतुर्भुज रूपवाला
वेदैः	= वेदोंसे	अहम्	= मैं
न	= न	द्रष्टुम्	= देखा जानेको
तपसा	= तपसे	शक्यः	= शक्य हूं (कि)
न	= न	यथा	= जैसे
दानेन	= दानसे	माम्	= मेरेको
च	= और	(त्वम्)	= तुमने
न	= न	दृष्टवानसि	= देखा है
इज्यया	= यज्ञसे		

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥

भक्त्या, तु, अनन्यया, शक्यः, अहम्, एवंविधः, अर्जुन, ज्ञातुम्, द्रष्टुम्, च, तत्त्वेन, प्रवेष्टुम्, च, परंतप ॥५४॥

परंतु—

परंतप	= हे श्रेष्ठ तपवाले	तु	= तो
अर्जुन	= अर्जुन	एवंविधः	= इस प्रकार चतुर्भुज रूपवाला
अनन्यया	= अनन्य*		
भक्त्या	= भक्ति करके		

* अनन्यभक्तिका भाव अगले श्लोकमें विस्तारपूर्वक कहा है।

अहम् = मैं
द्रष्टुम् = प्रत्यक्ष देखनेके लिये (और)
तत्त्वेन = तत्त्वसे
ज्ञातुम् = जाननेके लिये
च = तथा
प्रवेष्टुम् = प्रवेश करनेके लिये अर्थात् एकीभावसे प्राप्त होनेके लिये
च = भी
शक्यः = शक्य हूं

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥

मत्कर्मकृत्, मत्परमः, मद्भक्तः, सङ्गवर्जितः,
निर्वैरः, सर्वभूतेषु, यः, सः, माम्, एति, पाण्डव ॥५५॥

पाण्डव = हे अर्जुन
यः = जो पुरुष
मत्कर्मकृत् = केवल मेरे ही लिये (सब कुछ मेरा समझता हुआ) यज्ञ, दान और तप आदि संपूर्ण कर्तव्यकर्मोंको करनेवाला है (और)
मत्परमः = मेरे परायण है अर्थात् मेरेको परम आश्रय और परम गति मानकर मेरी प्राप्तिके लिये तत्पर है (तथा)
मद्भक्तः = मेरा भक्त है अर्थात् मेरे नाम गुण प्रभाव और रहस्यके श्रवण कीर्तन मनन ध्यान और पठनपाठनका प्रेमसहित निष्कामभावसे निरन्तर अभ्यास करनेवाला है (और)

सङ्गवर्जितः	= आसक्ति-रहित है अर्थात् स्त्री पुत्र और धनादि संपूर्ण सांसारिक पदार्थोंमें स्नेह-रहित है (और)	सर्वभूतेषु	= संपूर्ण भूत-प्राणियोंमें
		निर्वैरः	= वैरभावसे रहित है* (ऐसा)
		सः	= वह (अनन्य भक्तिवाला पुरुष)
		माम्	= मेरेको (ही)
		एति	= प्राप्त होता है

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-संवादे विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः ॥ ११ ॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्रविषयक श्रीकृष्ण और अर्जुनके संवादमें "विश्वरूपदर्शनयोग" नामक ग्यारहवां अध्याय ।

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

---

* सर्वत्र भगवद्बुद्धि हो जानेसे उस पुरुषका अति अपराध करनेवालेमें भी वैरभाव नहीं होता है । फिर औरोंमें तो कहना ही क्या है ।

ॐ

श्रीपरमात्मने नमः

अथ द्वादशोऽध्यायः

अर्जुन उवाच

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥

एवम्, सततयुक्ताः, ये, भक्ताः, त्वाम्, पर्युपासते,
ये, च, अपि, अक्षरम्, अव्यक्तम्, तेषाम्, के, योगवित्तमाः ॥१॥

इस प्रकार भगवान्‌के वचनोंको सुनकर अर्जुन बोला, हे मनमोहन—

ये	= जो	पर्युपासते	= अतिश्रेष्ठभावसे उपासते हैं
भक्ताः	= अनन्यप्रेमी भक्तजन	च	= और
एवम्	= इस पूर्वोक्त प्रकारसे	ये	= जो
सततयुक्ताः	= निरन्तर आपके भजन ध्यानमें लगे हुए	अक्षरम्	= अविनाशी सच्चिदानन्द-घन
		अव्यक्तम्	= निराकारको
		अपि	= ही (उपासते हैं)
त्वाम्	= आप सगुणरूप परमेश्वरको	तेषाम्	= उन दोनों प्रकारके भक्तोंमें

योगवित्तमाः = {अति उत्तम योगवेत्ता | के = कौन हैं

श्रीभगवानुवाच

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥

मयि, आवेश्य, मनः, ये, माम्, नित्ययुक्ताः, उपासते,
श्रद्धया, परया, उपेताः, ते, मे, युक्ततमाः, मताः ॥२॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण भगवान् बोले, हे अर्जुन !

मयि = मेरेमें
मनः = मनको
आवेश्य = एकाग्र करके
नित्ययुक्ताः = {निरन्तर मेरे भजन ध्यानमें लगे हुए*
ये = जो भक्तजन
परया = अतिशय श्रेष्ठ
श्रद्धया = श्रद्धासे
उपेताः = युक्त हुए
माम् = {मुझ सगुणरूप परमेश्वरको
उपासते = भजते हैं
ते = वे
मे = मेरेको
युक्ततमाः = {योगियोंमें भी अति उत्तम योगी
मताः = मान्य हैं

अर्थात् उनको मैं अति श्रेष्ठ मानता हूं

---

* अर्थात् गीता अध्याय ११ श्लोक ५५ में लिखे हुए प्रकारसे निरन्तर मेरेमें लगे हुए ।

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥

ये, तु, अक्षरम्, अनिर्देश्यम्, अव्यक्तम्, पर्युपासते,
सर्वत्रगम्, अचिन्त्यम्, च, कूटस्थम्, अचलम्, ध्रुवम् ॥३॥
संनियम्य, इन्द्रियग्रामम्, सर्वत्र, समबुद्धयः,
ते, प्राप्नुवन्ति, माम्, एव, सर्वभूतहिते, रताः ॥४॥

तु = और
ये = जो पुरुष
इन्द्रियग्रामम् = इन्द्रियोंके समुदायको
संनियम्य = अच्छी प्रकार वशमें करके
अचिन्त्यम् = मन बुद्धिसे परे
सर्वत्रगम् = सर्वव्यापी
अनिर्देश्यम् = अकथनीय स्वरूप
च = और
कूटस्थम् = सदा एकरस रहनेवाले
ध्रुवम् = नित्य
अचलम् = अचल
अव्यक्तम् = निराकार
अक्षरम् = अविनाशी सच्चिदानन्दघन ब्रह्मको
पर्युपासते = निरन्तर एकीभावसे ध्यान करते हुए उपासते हैं
ते = वे
सर्वभूतहिते रताः = संपूर्ण भूतोंके हितमें रत हुए

(और)		(भी)	
सर्वत्र	= सबमें	माम्	= मेरेको
समबुद्धयः	= समान भाववाले योगी	एव	= ही
		प्राप्नुवन्ति	= प्राप्त होते हैं

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥

क्लेशः, अधिकतरः, तेषाम्, अव्यक्तासक्तचेतसाम्, अव्यक्ता, हि, गतिः, दुःखम्, देहवद्भिः, अवाप्यते ॥ ५ ॥

किंतु—

तेषाम्	= उन	अधिकतरः	= विशेष है
अव्यक्तासक्तचेतसाम्	= सच्चिदानन्दघन निराकार ब्रह्ममें आसक्त हुए चित्तवाले पुरुषोंके	हि	= क्योंकि
		देहवद्भिः	= देहाभिमानियोंसे
		अव्यक्ता	= अव्यक्तविषयक
		गतिः	= गति
क्लेशः	= (साधनमें) क्लेश अर्थात् परिश्रम	दुःखम्	= दुःखपूर्वक
		अवाप्यते	= प्राप्त की जाती है—

अर्थात् जबतक शरीरमें अभिमान रहता है तबतक शुद्ध सच्चिदानन्दघन निराकार ब्रह्ममें स्थिति होनी कठिन है।

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥

ये, तु, सर्वाणि, कर्माणि, मयि, संन्यस्य, मत्पराः,
अनन्येन, एव, योगेन, माम्, ध्यायन्तः, उपासते ॥ ६ ॥

तु = और
ये = जो
मत्पराः = मेरे परायण हुए भक्तजन
सर्वाणि = संपूर्ण
कर्माणि = कर्मोंको
मयि = मेरेमें
संन्यस्य = अर्पण करके
माम् = मुझ सगुणरूप परमेश्वरको
एव = ही
अनन्येन = (तैलधाराके सदृश) अनन्य
योगेन = ध्यानयोगसे
ध्यायन्तः = निरन्तर चिन्तन करते हुए
उपासते = भजते हैं*

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥

तेषाम्, अहम्, समुद्धर्ता, मृत्युसंसारसागरात्,
भवामि, नचिरात्, पार्थ, मयि, आवेशितचेतसाम् ॥ ७ ॥

---

* इस श्लोकका विशेष भाव जाननेके लिये गीता अध्याय ११ श्लोक ५५ देखना चाहिये।

पार्थ	= हे अर्जुन	नचिरात्	= शीघ्र ही
तेषाम्	= उन	मृत्युसंसार-सागरात्	= मृत्युरूप संसारसमुद्रसे
मयि	= मेरेमें	समुद्धर्ता	= उद्धार करनेवाला
आवेशित-चेतसाम्	= चित्तको लगानेवाले प्रेमी भक्तोंका	भवामि	= होता हूं
अहम्	= मैं		

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥

मयि, एव, मनः, आधत्स्व, मयि, बुद्धिम्, निवेशय,
निवसिष्यसि, मयि, एव, अतः, ऊर्ध्वम्, न, संशयः॥ ८ ॥

इसलिये हे अर्जुन ! तूं–

मयि	= मेरेमें	मयि	= मेरेमें
मनः	= मनको	एव	= ही
आधत्स्व	= लगा (और)	निवसिष्यसि	= निवास करेगा अर्थात् मेरेको ही प्राप्त होगा
मयि	= मेरेमें	(अत्र)	= इसमें (कुछ भी)
एव	= ही	संशयः	= संशय
बुद्धिम्	= बुद्धिको	न	= नहीं है
निवेशय	= लगा		
अतः	= इसके		
ऊर्ध्वम्	= उपरान्त (तूं)		

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥

अथ, चित्तम्, समाधातुम्, न, शक्नोषि, मयि, स्थिरम्,
अभ्यासयोगेन, ततः, माम्, इच्छ, आप्तुम्, धनंजय ॥९॥

और–

अथ	= यदि (तूं)	ततः	= तो
चित्तम्	= मनको	धनंजय	= हे अर्जुन
मयि	= मेरेमें	अभ्यास-योगेन	= अभ्यासरूप* योगके द्वारा
स्थिरम्	= अचल	माम्	= मेरेको
समाधातुम्	= स्थापन करनेके लिये	आप्तुम्	= प्राप्त होनेके लिये
न शक्नोषि	= समर्थ नहीं है	इच्छ	= इच्छा कर

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥

अभ्यासे, अपि, असमर्थः, असि, मत्कर्मपरमः, भव,
मदर्थम्, अपि, कर्माणि, कुर्वन्, सिद्धिम्, अवाप्स्यसि ॥१०॥

और यदि तूं–

अभ्यासे	= ऊपर कहे हुए अभ्यासमें	असमर्थः	= असमर्थ
		असि	= है
अपि	= भी	(तर्हि)	= तो

---

* भगवान्‌के नाम और गुणोंका श्रवण, कीर्तन, मनन तथा श्वासके द्वारा जप और भगवत्प्राप्तिविषयक शास्त्रोंका पठन-पाठन इत्यादि चेष्टाएं भगवत्प्राप्तिके लिये बारम्बार करनेका नाम अभ्यास है ।

मत्कर्म-परमः = केवल मेरे लिये कर्म करनेके ही परायण*
भव = हो (इस प्रकार)
मदर्थम् = मेरे अर्थ
कर्माणि = कर्मोंको
कुर्वन् = करता हुआ
अपि = भी
सिद्धिम् = मेरी प्राप्तिरूप सिद्धिको (ही)
अवाप्स्यसि = प्राप्त होगा

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥

अथ, एतत्, अपि, असक्तः, असि, कर्तुम्, मद्योगम्, आश्रितः, सर्वकर्मफलत्यागम्, ततः, कुरु, यतात्मवान् ॥११॥

और—

अथ = यदि
एतत् = इसको
अपि = भी
कर्तुम् = करनेके लिये
अशक्तः = असमर्थ
असि = है
ततः = तो
यतात्मवान् = जीते हुए मनवाला
(और)
मद्योगम् = मेरी प्राप्तिरूप योगके
आश्रितः = शरण हुआ

---

* स्वार्थको त्यागकर तथा परमेश्वरको ही परम आश्रय और परम गति समझकर निष्काम प्रेमभावसे सतीशिरोमणि पतिव्रता स्त्रीकी भांति मन, वाणी और शरीरद्वारा परमेश्वरके ही लिये यज्ञ, दान और तपादि संपूर्ण कर्तव्यकर्मोंके करनेका नाम "भगवत्-अर्थ कर्म करनेके परायण होना" है ।

सर्वकर्म-फलत्यागम्	= सब कर्मोंके फलका मेरे लिये त्याग*	कुरु	= कर

श्रेयो हि ज्ञानमभ्यासा-
ज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्याग-
स्त्यागाच्छान्तिरनन्तरम् ॥१२॥

श्रेयः, हि, ज्ञानम्, अभ्यासात्, ज्ञानात्, ध्यानम्, विशिष्यते, ध्यानात्, कर्मफलत्यागः, त्यागात्, शान्तिः, अनन्तरम्॥ १२॥

हि	= क्योंकि (मर्मको न जान-कर किये हुए)	ज्ञानात्	= परोक्षज्ञानसे
अभ्यासात्	= अभ्याससे	ध्यानम्	= मुझ परमेश्वरके स्वरूपका ध्यान
ज्ञानम्	= परोक्षज्ञान†	विशिष्यते	= श्रेष्ठ है (तथा)
श्रेयः	= श्रेष्ठ है (और)	ध्यानात्	= ध्यानसे भी

---

* गीता अध्याय ९ श्लोक २७ में इसका विस्तार देखना चाहिये ।

† सुननेसे और शास्त्र पठन करनेसे परमेश्वरके स्वरूपका जो अनुमान ज्ञान होता है उसीका नाम परोक्षज्ञान है ।

कर्मफल-त्यागः = सब कर्मोंके फलका मेरे लिये त्याग* करना

(विशिष्यते) = श्रेष्ठ है

(और)

त्यागात् = त्यागसे

अनन्तरम् = तत्काल ही

शान्तिः = परम शान्ति होती है

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥

अद्वेष्टा, सर्वभूतानाम्, मैत्रः, करुणः, एव, च,
निर्ममः, निरहंकारः, समदुःखसुखः, क्षमी ॥१३॥

इस प्रकार शान्तिको प्राप्त हुआ जो पुरुष—

सर्वभूतानाम् = सब भूतोंमें

अद्वेष्टा = द्वेषभावसे रहित

(एवं)

मैत्रः = स्वार्थरहित सबका प्रेमी

च = और

करुणः = हेतुरहित दयालु है

(तथा)

एव = †

निर्ममः = ममतासे रहित (एवं)

निरहंकारः = अहंकारसे रहित

---

* केवल भगवत्-अर्थ कर्म करनेवाले पुरुषका भगवत्में प्रेम और श्रद्धा तथा भगवत्का चिन्तन भी बना रहता है, इसलिये ध्यानसे कर्मफलका त्याग श्रेष्ठ कहा है ।

† "एव" शब्द यहां सब गुणोंका समुच्चय करनेके लिये समझना चाहिये ।

समदुःखसुखः = सुख दुःखोंकी प्राप्तिमें सम (और)

क्षमी = क्षमावान् है अर्थात् अपराध करनेवालेको भी अभय देनेवाला है

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥

संतुष्टः, सततम्, योगी, यतात्मा, दृढनिश्चयः,
मयि, अर्पितमनोबुद्धिः, यः, मद्भक्तः, सः, मे, प्रियः॥१४॥

तथा—

यः = जो

योगी = ध्यानयोगमें युक्त हुआ

सततम् = निरन्तर

संतुष्टः = लाभ हानिमें संतुष्ट है

(तथा)

यतात्मा = मन और इन्द्रियोंसहित शरीरको वशमें किये हुए

दृढनिश्चयः = मेरेमें दृढ निश्चयवाला है

सः = वह

मयि = मेरेमें

अर्पित-मनोबुद्धिः = अर्पण किये हुए मन बुद्धिवाला

मद्भक्तः = मेरा भक्त

मे = मेरेको

प्रियः = प्रिय है

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥

यस्मात्, न, उद्विजते, लोकः, लोकात्, न, उद्विजते, च, यः, हर्षामर्षभयोद्वेगैः, मुक्तः, यः, सः, च, मे, प्रियः ॥१५॥

तथा—

यस्मात्	= जिससे	च	= तथा
लोकः	= कोई भी जीव	यः	= जो
न उद्विजते	= उद्वेगको प्राप्त नहीं होता है	हर्ष	= हर्ष
		अमर्ष	= अमर्ष*
च	= और	भय	= भय (और)
यः	= जो (स्वयं भी)	उद्वेगैः	= उद्वेगादिकोंसे
लोकात्	= किसी जीवसे	मुक्तः	= रहित है
न उद्विजते	= उद्वेगको प्राप्त नहीं होता है	सः	= वह भक्त
		मे	= मेरेको
		प्रियः	= प्रिय है

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥

अनपेक्षः, शुचिः, दक्षः, उदासीनः, गतव्यथः, सर्वारम्भपरित्यागी, यः, मद्भक्तः, सः, मे, प्रियः ॥ १६ ॥

और—

यः	= जो पुरुष	अनपेक्षः	= आकाङ्क्षासे रहित (तथा)

* दूसरेकी उन्नतिको देखकर संताप होनेका नाम अमर्ष है ।

शुचिः	= बाहर भीतरसे शुद्ध* (और)	गतव्यथः	= दुःखोंसे छूटा हुआ है
दक्षः	= चतुर है अर्थात् जिस कामके लिये आया था उसको पूरा कर चुका है (एवं)	सः	= वह
		सर्वारम्भ-परित्यागी	= सर्व आरम्भोंका त्यागी†
उदासीनः	= पक्षपातसे रहित (और)	मद्भक्तः	= मेरा भक्त
		मे	= मेरेको
		प्रियः	= प्रिय है

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥

यः, न, हृष्यति, न, द्वेष्टि, न, शोचति, न, काङ्क्षति, शुभाशुभपरित्यागी, भक्तिमान्, यः, सः, मे, प्रियः ॥ १७ ॥

और —

यः	= जो	काङ्क्षति	= कामना करता है (तथा)
न	= न (कभी)	यः	= जो
हृष्यति	= हर्षित होता है	शुभाशुभ-परित्यागी	= शुभ और अशुभ संपूर्ण कर्मोंके फलका त्यागी है
न	= न		
द्वेष्टि	= द्वेष करता है		
न	= न		
शोचति	= शोच करता है	सः	= वह
न	= न		

* गीता अ० १३ श्लोक ७ की टिप्पणीमें इसका विस्तार देखना चाहिये।

† अर्थात् मन, वाणी और शरीरद्वारा प्रारब्धसे होनेवाले संपूर्ण स्वाभाविक कर्मोंमें कर्तापनके अभिमानका त्यागी ।

भक्तिमान् = { भक्तियुक्त / पुरुष | मे = मेरेको | प्रियः = प्रिय है

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥

समः, शत्रौ, च, मित्रे, च, तथा, मानापमानयोः,
शीतोष्णसुखदुःखेषु, समः, सङ्गविवर्जितः ॥ १८ ॥

और जो पुरुष—

शत्रौ = शत्रु
मित्रे = मित्रमें
च = और
मानापमानयोः = { मान / अपमानमें
समः = सम है
तथा = तथा

शीतोष्ण-सुखदुःखेषु = { सर्दी गर्मी और सुख-दुःखादिक द्वन्द्वोंमें
समः = सम है
च = और (सब संसारमें)
सङ्ग-विवर्जितः = { आसक्तिसे / रहित है

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥

तुल्यनिन्दास्तुतिः, मौनी, संतुष्टः, येन, केनचित्,
अनिकेतः, स्थिरमतिः, भक्तिमान्, मे, प्रियः, नरः ॥ १९ ॥

तथा जो—

तुल्य-निन्दास्तुतिः	= निन्दा स्तुतिको समान समझने-वाला (और)	संतुष्टः	= सदा ही सन्तुष्ट है
		(और)	
		अनिकेतः	= रहनेके स्थानमें ममतासे रहित है
मौनी	= मननशील है* (एवं)	(सः)	= वह
		स्थिरमतिः	= स्थिर बुद्धिवाला
येन केनचित्	= जिस किस प्रकारसे भी शरीरका निर्वाह होनेमें	भक्तिमान्	= भक्तिमान्
		नरः	= पुरुष
		मे	= मेरेको
		प्रियः	= प्रिय है

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥

ये, तु, धर्म्यामृतम्, इदम्, यथा, उक्तम्, पर्युपासते,
श्रद्दधानाः, मत्परमाः, भक्ताः, ते, अतीव, मे, प्रियाः ॥२०॥

तु	= और	मत्परमाः	= मेरे परायण हुए†
ये	= जो		

---

* अर्थात् ईश्वरके स्वरूपका निरन्तर मनन करनेवाला है ।

† अर्थात् मेरेको परम आश्रय और परम गति एवं सबका आत्मरूप और सबसे परे परमपूज्य समझकर विशुद्ध प्रेमसे मेरी प्राप्तिके लिये तत्पर हुए ।

श्रद्दधानाः	= श्रद्धायुक्त* पुरुष	पर्युपासते	= निष्कामभावसे सेवन करते हैं
इदम्	= इस	ते	= वे
यथा उक्तम्	= ऊपर कहे हुए	भक्ताः	= भक्त
		मे	= मेरेको
धर्म्यामृतम्	= धर्ममय अमृतको	अतीव	= अतिशय
		प्रियाः	= प्रिय हैं

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-संवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥ १२ ॥

इति श्रीमद्भगवद्गीतारूपी उपनिषद् एवं ब्रह्मविद्या तथा योगशास्त्रविषयक श्रीकृष्ण और अर्जुनके संवादमें "भक्तियोग" नामक बारहवां अध्याय ॥ १२ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

---

* वेद, शास्त्र, महात्मा और गुरुजनोंके तथा परमेश्वरके वचनोंमें प्रत्यक्षके सदृश विश्वासका नाम श्रद्धा है ।

ॐ

श्रीपरमात्मने नमः

अथ त्रयोदशोऽध्यायः

श्रीभगवानुवाच

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥

इदम्, शरीरम्, कौन्तेय, क्षेत्रम्, इति, अभिधीयते,
एतत्, यः, वेत्ति, तम्, प्राहुः, क्षेत्रज्ञः, इति, तद्विदः ॥ १ ॥

उसके उपरान्त श्रीकृष्ण भगवान् फिर बोले—

कौन्तेय	= हे अर्जुन	वेत्ति	= जानता है
इदम्	= यह	तम्	= उसको
शरीरम्	= शरीर	क्षेत्रज्ञः	= क्षेत्रज्ञ
क्षेत्रम्	= क्षेत्र है*	इति	= ऐसा
इति	= ऐसे	तद्विदः	= उनके तत्त्वको जाननेवाले ज्ञानीजन
अभिधीयते	= कहा जाता है		
	(और)		
एतत्	= इसको		
यः	= जो	प्राहुः	= कहते हैं

* जैसे खेतमें बोये हुए बीजोंका उनके अनुरूप फल समयपर प्रकट होता है वैसे ही इसमें बोये हुए कर्मोंके संस्काररूप बीजोंका फल समयपर प्रकट होता है, इसलिये इसका नाम क्षेत्र ऐसा कहा है ।

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥

क्षेत्रज्ञम्, च, अपि, माम्, विद्धि, सर्वक्षेत्रेषु, भारत,
क्षेत्रक्षेत्रज्ञयोः, ज्ञानम्, यत्, तत्, ज्ञानम्, मतम्, मम॥ २॥

च = और
भारत = हे अर्जुन (तू)
सर्वक्षेत्रेषु = सब क्षेत्रोंमें
क्षेत्रज्ञम् = क्षेत्रज्ञ अर्थात् जीवात्मा
अपि = भी
माम् = मेरेको ही
विद्धि = जान*
(और)

क्षेत्रक्षेत्रज्ञयोः = क्षेत्रक्षेत्रज्ञका अर्थात् विकारसहित प्रकृतिका और पुरुषका
यत् = जो
ज्ञानम् = तत्त्वसे जानना है†
तत् = वह
ज्ञानम् = ज्ञान है
(इति) = ऐसा
मम = मेरा
मतम् = मत है

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु॥

---

* गीता अध्याय १५ श्लोक ७ और उसकी टिप्पणी देखनी चाहिये।

† गीता अध्याय १३ श्लोक २३ और उसकी टिप्पणी देखनी चाहिये।

तत्, क्षेत्रम्, यत्, च, यादृक्, च, यद्विकारि, यतः, च, यत्,
सः, च, यः, यत्प्रभावः, च, तत्, समासेन, मे, शृणु ॥ ३ ॥

इसलिये—

तत्	= वह	च	= तथा
क्षेत्रम्	= क्षेत्र	सः	= वह (क्षेत्रज्ञ)
यत्	= जो है	च	= भी
च	= और	यः	= जो है (और)
यादृक्	= जैसा है	यत्प्रभावः	= जिस प्रभाववाला है
च	= तथा	तत्	= वह सब
यद्विकारि	= जिन विकारोंवाला है	समासेन	= संक्षेपसे
च	= और	मे	= मेरेसे
यतः	= जिस कारणसे	शृणु	= सुन
यत्	= जो हुआ है		

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

